Public Domain Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

C 555

THE RATNATRAYAPARIKSHA

BY

Sri APPAYYA DIKSHITA

WITH HIS COMMENTARY

1952

First Edition] [Price : Re 1—0—0

Public domain. Digitization Muthulakshmi Research Acade

Public domain. Digitization Muthulakshmi Research Academy

Public domain. Digitization Muthulakshmi Research Academy

Public domain. Digitization Muthulakshmi Research Acade

THE
RATNATRAYAPARIKSHA

BY

Sri APPAYYA DIKSHITA
WITH HIS COMMENTARY

EDITED BY

M. V. PRANATHARTHY HARA SASTRY

Published by:

SESHADRI PRESS, MYSORE

1952

First Edition] [Price: Re 1—0—0

Public domain. Digitization Muthulakshmi Research Acade

Copies can be had of

M. V. SESHADRI & Co.,

Balepet, Bangalore City

All Rights Reserved by the Publisher.

PRINTED AT THE SESHADRI PRESS, MYSORE.
BY M. V. PRANATHARTHYHARAN, PROPRIETOR.

Public domain. Digitization Muthulakshmi Research Acade

रत्नत्रयपरीक्षा

अद्वैतविद्याचार्य श्रीकण्ठमतप्रतिष्ठापक
चतुरधिकशत प्रबन्धनिर्मातृ

श्रीमदप्पयदीक्षितेन्द्रैः

विरचिता

स्वकीय व्याख्यया

संविलता

शेषाद्रि प्रेस, मैसूर

१९५२

प्रथम संस्करण]   [मूल्यं १—०—०

Public domain. Digitization Muthulakshmi Research Acade

निवेदनम्

विज्ञाप्यं किंचित् विज्ञापयामि। शिवपरवचसां पुराणागमनां शिवे परत्वमसहमानैः शिवविद्वेषिभिः कैश्चित् तेषां तामसत्वकल्पनार्थं कल्प्यमानयुक्त्याभासान् सप्रमाणयुक्तिभिः निरस्य निर्धार्य च सात्विकत्वं, सर्वमंगलाश्रिते परममंगले शिवे भक्तिमतां हृदयाह्लादविषयपरिमलपरिमलितः मुद्रणावस्थास्थः श्रीमदप्पयदीक्षितेन्द्र विरचित शिवतत्त्वविवेक श्रीमन्नीलकण्ठदीक्षितेन्द्र रचित शिवतत्त्वरहस्य श्रीमत्कालहस्तीशविलासकार कृत श्रीकालहस्तीशविलास ग्रन्थेभ्यः अन्येषां बहूनां ग्रन्थकाराणां ग्रन्थेभ्यश्च सादरं संगृहीतः शिवपरवचसांसात्विकत्वनिर्णयाख्यः निबन्धः, सात्विकचित्तवृत्तीनां महनीयानां भावुकानां भवतां अचिरेणैव कालेन दृष्टिपथमधिरोढुं अभिलषतीति निवेदयितुमुत्सुकते मे हृदयम् ।

Public domain. Digitization Muthulakshmi Research Acade

INTRODUCTION

Srimad Appayya Dikshita occupies an unique place of honour among the great teachers of India. His *magnum opus* the परिमल which constitutes the triumphant culmination of the अद्वैतपञ्चग्रन्थी earned for him the title of अद्वैतस्थापनाचार्य. His monumental commentary on श्रीकण्ठभाष्य called शिवार्कमणिदीपिका designed for the resuscitation of शैवविशिष्टाद्वैत of Srikanthacharya was a tremendous success in as much as it inaugurated an almost immediate outburst of renascent Saivism in South India. This unparalleled achievement brought him the title of श्रीकण्ठमतप्रतिष्ठापनाचार्य. Sri Dikshita saw no real antagonism between the views of Sri Sankara and those of Srikantha, and would make out that the hypotheses of the latter formed the stepping stone for the realization of the truth of the former's teachings.

Sri Dikshita's services to Advaita and to Saivism.

With remarkable catholicity of outlook and thoroughness of method so characteristic of him, Sri Dikshita also wrote expository treatises on the doctrines of the two great schools of thought still further removed from Advaitism. Thus in his चतुर्मतसार he made a clear

And to the other two schools of Philosophy

Public domain. Digitization Muthulakshmi Research Acade

and masterly *resume* of the processes of the philosophic thought not only of शिवाद्वैत and अद्वैत but also of द्वैत and विशिष्टाद्वैत in separate sections entitled in order, नयमणिमाला, नयमञ्जरी न्यायमुक्तावली and नयमयूखमालिका. The two latter treatises have won the esteem of the protogonists of the respective schools themselves, for the able and impartial treatment in them of the distinctive systems of interpretation of the Vyasasutras.

Sri Dikshita, however, from his position as an Advaitin criticised the two rival schools in his works bearing the significant titles of मध्वमतविध्वंसन and रामानुजश्रृंगभंग respectively.

As between शिवाद्वैत and अद्वैत, it is not easy for us to determine if at all Sri Dikshita was more partial to the one than to the other. Both the schools claim him as their redoubtable champion, no doubt for good reasons. Yet several of Sri Dikshita's direct statements unmistakably reveal him as a staunch Advaitin.*

---

* यद्यप्यद्वैत एव श्रुतिशिखरगिरामागमानां च निष्ठा ।
.. ..
प्रत्नैराचार्यरत्नैरपि परिजगृहे शंकराद्यैस्तदेव ॥
तथाप्यनुग्रहादेव तरुणेन्दु शिखामणेः ।
अद्वैतवासना पुंसामाविर्भवति नान्यथा ॥

Public domain. Digitization Muthulakshmi Research Acade

To him the Sivadvaita philosophy of Srikantha was only the penultimate rung of the ladder in progressive philosophic thought. From the heights of his philosophic enlightenment, Sri Dikshita pondered on the ways and means of reconciling the rival schools not only of Advaita and Srikanthamata, but also of Visishtadvaita and Dvaita, and spread a message of tolerance and accommodation exclaiming — *

यन्नानाभाष्यशाखोदितफलविततिः प्रौढनानारसाढ्या
    यस्मिन् मूले निरूढं फलमधिकतरं स्वाद्वनारुह्य लभ्यम् ।
यस्य प्रेक्षैव देहद्वयतदनुगतप्रत्यगतौ विविङ्क्ते
    सूत्रात्मा पारिजातः सकलमभिमतं मह्यमर्थं स दद्यात् ॥

आनन्दतीर्थमुनिलक्ष्मणदेशिकेन्द्र -
श्रीकण्ठयोगिपदवीरदवीयसीर्नः ।
आचार्यपादसरणिं च विविच्य बोद्धुं
संगृह्यते मतचतुष्टयसारलेशः ॥

These two verses are introductory to the Chaturmatasarasangraha.

It is traditionally believed that the introductory verse to the Parimala गुरुभिरुपदिष्टमर्थं

---

* नानाभाष्यहृता सा सगुणफलगतिर्वैधविद्याविशेषै –
    स्तत्तद्देशास्तिरम्या सरिदिव सकला यत्र यात्यंशभूयम् ॥
तस्मिन्नानन्दसिंधावतिमहति फले भावविश्रान्तिमुद्रा
    शास्त्रस्योद्घाटिता यैः प्रणमत हृदि तान्नित्यमाचार्यपादान् ॥

Public domain. Digitization Muthulakshmi Research Acade

विस्मृतमपि तत्र बोधितः प्राज्ञैः । अवलम्ब्य शिवमधीयन् यथामति व्याकरोमि कल्पतरुम् ॥ contains an allusion to an interview of Sri Dikshita with Sri Nrisimhasrama Swami in which the learned recluse induced Sri Dikshita to devote himself whole-heartedly to the elucidation and uplift of Advaita philosophy, instead of his plunging into prolonged sectarian controversies with the Vaishnavas. Following this advice of an esteemed contemporary, Sri Dikshita, it is said, wrote his celebrated commentary on the Kalpataru and also several other works in due course, expounding the Advaita philosophy.

Sri Nrisimhaswam and Sri Dikshita's literary activities

Why Sri Dikshita had to throw himself into the controversial muddle

An utterance of Sri Dikshita quoted in the लौकिकरत्नाकर of Raghunathavarma explains why Sri Dikshita was at all drawn into the vortex of sectarian controversies while he would have been happy to remain a steady exponent of Advaitism all through. The verse is as follows—

विष्णुर्वा शङ्करो वा श्रुतिशिखरगिरामस्तु तात्पर्यभूमिः
नास्माकं तत्र वादः प्रसरति किमपि स्पष्टमद्वैतभाजाम् ।
किन्त्वीशद्वेषगाढानलकलितहृदां दुर्मतीनां दुरुक्तीः
भङ्क्तुं यत्नो ममायं नहि भवतु ततो विष्णुविद्वेषशङ्का ॥

Sri Raghunathavarma introducing the verse says— अतएव श्रीमदप्पय्यदीक्षितैः शिवद्वेषिवैष्णवंमन्य-

Public domain. Digitization Muthulakshmi Research Acade

रामानुजाद्यनुयायिभिः प्रतिपादितविष्णूत्कर्षशिवापकर्ष विपरीतोत्कर्षापकर्षप्रतिपादनपरैः शिष्टनिन्दावारणाय स्वानुयायिनां शिवविष्ण्वादिषूत्कर्षापकर्षबुद्ध्यनुवृत्तिवारणाय चोक्तम् ।

Sectarian tendencies.

There are also some well-known anecdotes in the life of the great Dikshita preserved in authentic tradition, which taken with the gleanings from the pages of South Indian history during the 16th century compel us to conclude that the doctrinal differences of a previous age between the Visishtadvaitins and the Advaitins degenerated into sharp sectarian prejudices in matters of cult and creed. And Sri Dikshita played a great part in the cultural history of South India in the 16th century not merely through his contributing towards a reconciliation and synthesis in the sphere of the academical contests, but also by his untiring efforts for the establishment of tolerance and accommodation in the sphere of the practice of religion, lifting it from the low level of bigotry and aggressive proselytism.

and proselytizing activities of Vaishnavism in the 16th century.

About the middle of the 16th century A.D. the fury of Vaishnavite proselytism was raging under the guidance of the Rajaguru Sri Tatacharya. Vijayanagara was then under the rule of Ramaraja the regent of Sadasivaraya.

ublic domain. Digitization Muthulakshmi Research Acad

Ramaraja was an ardent Vaishnava and desciple of Sri Doddacharya (or Mahacharya) and Sri Tatacharya. During his times and during the times of the inheritors of the fragment of the empire after the battle of Talikota, mass convertions took place engineered by the Rajaguru under state patronage. There is ample evidence in the Vaishnava records and in the writings of Sri Appayya Dikshita, of the wide spread grave menace to Saivism to stamp out which from the land, the Vaishnavite zealots had taken a resolute vow. But the battle of Talikota had weakened the centre. Moslem rage had reduced the capital Vijayanagar to a heap of ruins and the monarchs rallying the remnants of sovereignty, shifted their political residence to Chandragiri or Penugonda. The former vassels of the shattered empire took this opportunity to assert their independence. Most prominent among those who thus emerged into importance from the disintegration of the empire, was *Chinna Bomma Naik* of Vellore who by his martial valour and political tact soon established himself in considerably enhanced power and glory.

Political conditions

Public domain. Digitization Muthulakshmi Research Acade

For counteracting the onrush of the Vaishnavite proselytism, Sri Appayya Dikshita secured the support of Chinna Bomma who ruled for about thirty years from 1549 A. D. The battle of Talikota took place in 1565 A. D. Sri Appayya Dikshita lived the longest period under the patronage of Chinna Bomma, as his own literary references show. The whole reign of Chinna Bomma synchronized with the prime of Sri Dikshita's life, during which period undoubtedly his keenest activities for the preservation, revival, reform and expansion of *Saivism* were carried on with great brilliance and splendid success.

Chinna Bomma and Sri Appayya Dikshita.

Sri Dikshita's writings on the philosophy and Cult of Saivism.

Sri Dikshita's writings which belonged to this period can be enumerated as follows :—

1. शिवकर्णामृतम्	2. शिखरिणीमाला
3. शिवतत्वविवेकः	4. रामायणतात्पर्यसङ्ग्रहः
5. भारततात्पर्यसंग्रहः	6. ब्रह्मतर्कस्तवः
7. रत्नत्रयपरीक्षा	8. शिवार्चनचन्द्रिका
9. शिवध्यानपद्धतिः	10. शिवमहिमकालिकास्तुतिः
11. शिवपूजाविधिः	12. शिवाद्वैतनिर्णयः
13. आनन्दलहरी	14. शिवार्कमणिदीपिका

It is no wonder that a contemporary poet

ublic domain. Digitization Muthulakshmi Research Acad

reflecting on the magnitude of these writings of Sri Dikshita and his close association with Chinna Bomna as his patron, exclaimed —

नानादेशनरेन्द्रमण्डलमहायत्नातिदूरीभवत् –
 कादाचित्कपदारविन्दविनतेरप्पय्ययज्वप्रभोः ।
शैवोत्कर्षपरिष्कृतैरहरहस्सूक्तैस्सुधास्यन्दिभिः
 फुल्लत्कर्णपुटस्य बोम्मनृपतेः पुण्यानि गण्यानि किम् ।

The शिवार्कमणिदीपिका is a commentary on the श्रीकण्ठभाष्य which forms the bedrock of Southern Saivism in as much as the faith is thereby founded upon an interpretation of the Brahmasutras of Sri Vyasa. On the completion of this monumental work Sri Appayya Dikshita was bathed in gold by King Chinna Bomma. This significant event is referred to in the works of some contemporary poets and also in the Adayappalam inscription dated 1582 A. D. The inscription further says that Chinna Bomma made endowments for the maintenance of a college of 500 scholars who studied शिवार्कमणि दीपिका under Sri Dikshita himself directly, for their equipping themselves properly for the Saivite propaganda work which had been organised with a view to stemming the formidable tide of Vaishnavite proselytism with the

The Sivarkamani Dipika.

in the inscription.

Public domain. Digitization Muthulakshmi Research Acade

aid of aggressive state policy. Thus Sri Appayya Dikshita was the guiding spirit of an immense mass movement with a huge band of trained volunteers at his back. He threw himself heart and soul into the mission for several years together in the prime of his life often facing occasions of personal danger, with undaunted courage and faith. He preached, organised and wrote incessantly, enlisted the co-operation of enlightened monarchs, undertook frequent travels and challenged his adverseries to stand their ground in open disputation. He brought to bear upon his wide-spread activities his resourceful and versatile personality and spread spiritual tolerance and goodwill. He did not even shun the Vijayanagar court and it is even conceded by tradition that Panchamata Bhanjana Tatacharya and he were good friends in their private capacity, at an earlier period. But the Nigraha-ashtaka depicts an atmosphere of tense belligerency. It is a thrilling piece of passionate poetry gushing out of his heart charged with desperate courage and faith, in an extremely critical situation in which he was placed, while buffeting against the mechinations of his religious adversary.

the ways and means

Progress and success.

ublic domain. Digitization Muthulakshmi Research Acad

The impetus for the revival of Saivism which Sri Appayya Dikshita gave during the middle of the 16th century A.D. after a strenuous and successful fight against the adverse powers, was followed by an almost immediate and extensive awakening and enthusiasm, and it is no wonder that many of the Saiva Mutts of South India now famous and influential, trace their beginnings to the later part of the 16th century A.D.

An Avatar

The शिवरहस्य thus refers to Sri Dikshita's historic mission as the resuscitator of शैवशास्त्र which had practically become extinct, and its widespread re-emergence through his efforts in all parts of the land "शैवशास्त्रं तदा भूमौ लुप्तं विस्तारयिष्यति".

Sri Dikshita relied to a large extent on the Puranic lore for supporting his conclusions conducive to the harmony of the sects and consolidation of a synthesis. He linked the Puranic teachings with the Upanishadic thought and proved them indentical. He did all this without resorting to strained subtleties of argument and without displaying the heat of controversial temper, but in the spirit of a calm and dispassionate search for truth.

Public domain. Digitization Muthulakshmi Research Academy

The Ratna Traya Pariksha

Among the works of this period of Sri Dikshita's literary activity which aimed at the redemption of Saivism from peril and establishment of good understanding between the rival sects, the Ratna Traya Pariksha, though short in form, occupies a prominent place on account of its establishing by dint of unimpeachable authority a synthesis of Hari, Hara and Gauri, the three gems of supreme quality among the gods. Sri Dikshita says at the conclusion of the work—

आमथ्य भाष्यदुग्धाब्धेराप्तं रत्नत्रयं ततः ।
शंभुर्गौरी हरिश्चेति तच्च सम्यक् परीक्षितम् ॥

"As the result of my churning the milky ocean of the Bhashya, I obtained three valuable gems namely Sambhu, Gauri and Hari from it. All the three gems, I have subjected to a critical scrutiny and then given my conclusions about them in this work."

Analysis of the content

The argument of the treatise can be summed up thus: ब्रह्मचैतन्य eternally distinguishes itself through the instrumentality of माया, as धर्मी and धर्म. This धर्म has been described as शक्ति in its manifold aspects and is equated to आकाश which Sri

ublic domain. Digitization Muthulakshmi Research Acade

Dikshita specifies as चिदम्बरशक्तिः. आकाश is then equated to सत्य which is described as प्रपञ्चाधार.

In the next step comes the आकाश-आनन्द equation. Sri Dikshita cites authority for this placing of आनन्द in the धर्म category. Next the five functions are mentioned as carried on by the धर्म assuming a dual form.

धर्मस्तु पुरुषरूपेण विश्वस्य उपादानं भवति ।
वनितारूपेण धर्मिणः परब्रह्मणः दिव्या महिषी भवति ।

Then Sri Dikshita proceeds to establish by citing authority that शक्ति, आनन्द and आकाश should be classed as the supreme being the ब्रह्म. Thus both गौरी and नारायण belong to the ब्रह्मकोटि and not to the जीवकोटि and the conclusion is –

एवं गौरीनारायणयोः शिवस्य च सत्यपि तत्तदुपासकफल-विशेषप्रदानाद्यनुगुणे काल्पनिके गुणप्रधानभावे वस्तुतः तयोः ब्रह्मकोटित्वं सिद्धम् ।

The work bristles with citations of illustrative stories and corroborative passages from the Skanda Purana, Kurma Purana, Hari Vamsa and others.

Sri Dikshita then goes on to emphasise how the worship of Narayana and Gauri is essential for the attainment of Siva.

Public domain. Digitization Muthulakshmi Research Acade

In conclusion, Sri Dikshita quotes the authority of the Bhashya for his cardinal postulates. By the Bhashya he means presumably the Srikantha Bhashya, for, just before the citations, he records that his exposition of the subject is based upon his intimate understanding of the Srikantha Bhashya.

And illustrative anecdote.

An anecdote in the life of Sri Appayya Dikshita illustrates how firmly he believed in what he preached and how the Gods signified to the world the truth and validity of his precepts. Once Sri Dikshita invoked God Siva in a Vishnu Temple and before the immediate witnesses could think he was mistaken, lo! the idol was seen metamorphosed for the nonce, thus proclaiming to the people not only the validity of the synthesis he preached but also indicating a touch of divinity in his personality.

Sri Nilakantha Dikshita seems to be in a reminiscent mood while he says in his Gangavatarana, introductory Sarga.

आगमैरप्यसंवेद्यमाद्यं यत्तत्वमैश्वरम् ।
आकुमारं परिज्ञातं तद्देवासीद्युक्तिभिः ॥

ublic domain. Digitization Muthulakshmi Research Acad

"A correct apprehension of the true nature of God which was still too remote for us even after the pronouncements of the Sacred texts, became so popularly familiar to all through his utterances that even a boy at play knew all about it."

Sri Nilakantha Dikshita's reference

More particularly he refers to the Ratna Traya Pariksha in —

नाकेऽपि सति देवानां माहात्म्यकलहे मिथः ।
वादश्शाम्यति यद्वाचि विन्यस्य निखिलं भरम् ॥

"Even the gods are content to place their rival claims to superiority before him for a balanced consideration, and are happy to abide by his judgement."

Sri Nilakantha Dikshita is full of echoes of the essential synthesis evolved by his great ancestor in the Ratna Traya Pariksha.

With his characteristic felicity of expression he recapitulates the Hari-Gauri synthesis in the Nilakantha Vijaya thus —

and parallels.

यदेतद्वामाङ्गं घनजघनकेशस्तनभरं
कदाचित्तच्छंभोर्भवति कमलाकौस्तुभधरम् ।
जगन्मातर्येवं यदपचरितं तन्मघवता
जगन्माता देवः प्रभवति स एव क्षपयितुम् ॥

"The left half of Iswara's form appearing in every aspect as a woman, sometimes assumes a

Public domain. Digitization Muthulakshmi Research Acade

form which is distinguished by its consortship with *Kamala* and by its wearing the *Kausthubha*. After all what is the difference between the two? The identical Almighty which was जगन्माता in one sense became जगन्माता in an other sense. That is to say the mother of the universe changed into the surveyor of the universe."

Another verse also of the Nilakantha Vijaya reminiscent of the Ratna Traya Pariksha —

ओमित्युमेति युवयोरभिधानमेकं
सृष्ट्यादिसृष्ट्यवधिताग्गुणमात्रभिन्नम् ।
एकं च तावदभिधेयमपीह रूपं
वेणी जटेति कचसंहतिभेदभिन्नम् ॥

Herein the identity of Siva and Gauri is spoken of and a synthesis of ओं and उमा mystically symbolical of creation and dissolution is propounded. It is maintained that what is denoted by both the mystic sound-symbols is an identical object though they relate to functions different in nature and assume distinct forms too wearing plaited or matted hair.

And again the following statement is in a very amusing manner put into the mouth of Iswara Himself addressing Vishnu —

शिवा घोरा चेति श्रुतिषु विदिते ते मम तनू
तयोराद्या मूर्तिः परमरमणीया त्वमसि मे ।

ublic domain. Digitization Muthulakshmi Research Acade

त्वमस्यर्धं देहे त्वमसि वदनं दक्षिणमिति
त्वयि प्रीये यावत्तव भवति तावच्च विदितम् ॥

"The Srutis speak of my two forms शिवा and घोरा of which you are the former one, bewitching in its beauty; you merge in me as one half of my body and you constitute my face on the right side. How much I love and esteem you, you alone can fully comprehend."

A popular legend gives an interesting setting to a verse attributed to Sri Dikshita which takes for granted the identity of Vishnu with Gauri. In it, Sasta, son of Vishnu in feminine form born to Siva is made to fall into an age-long reverie inquiring within himself how he should call Lakshmi the wife of his Mother, while he had no difficulty in giving the designation of a mother to his father's wife Gauri.

Sastha the son of Vishnu and Siva

अम्बेति गौरीमहमाह्वयामि पत्न्यः पितुः मातर एव सर्वाः ।
कथंनु लक्ष्मीमिति चिन्तयन्तं शास्तारमीडे सकलार्थसिद्ध्यै ॥

"Sri Tatachari in the same setting is said to have spoken thus —

विष्णोः सुतोऽहं विधिना समोऽहं धन्यस्ततोऽहं
सुरसेवितोऽहम् ।
तथापि भूतेशसुतोऽहमेतैर्भूतैर्वृतश्चिन्तयतीह शास्ता ॥

Public domain. Digitization Muthulakshmi Research Acade

Here *Sasta* is represented as being proud of his *mother Vishnu*, while he is made to regret his lot of being born to *Siva* – for by his mother he derives a high divine status, but being the son of his father, a leader of goblins, it has been his misfortune to live surrounded by goblins

But anyhow the point is conceded as incontrovertible that Vishnu in his faminine form is the consort of Siva.

The Vishnu-Gauri synthesis was admittedly not an ingenious invention of Sri Dikshita. On the other hand, Sri Dikshita claims for it the authority of antiquity and the sanction of all the sacred lore. That the idea had always been abroad can be easily proved, though it was wilfully ignored when sectarian schisms developed. Even the sacred songs of the Nayanmars and Alwars unreservedly proclaim this identity. A few instances may be cited.

1. அரியலால் தேவியில்லை ஐயன் ஐயாறனார்க்கே.
   (அப்பர்-4ம் திருமுறை-திருவையாறு.)
2. நாரணனை இடப்பாகத்தடைத்தார் போலும்.
   (அப்பர்-6ம் திருமுறை-திருவிழிமழலை.)
3. வலத்தனன் திரிபுரமெரித்தவன் இடம் பெற,
   உந்தித்தலத்து எழுதிசை முகன் படைத்த
   நல்லுலகும் தானும் புலப்பட.
   (நம்மாழ்வார்-திருவாய்மொழி- i-3-9)

ublic domain. Digitization Muthulakshmi Research Acade

4. பிறைதங்கு சடையானை வலத்தே வைத்து.
(திருமங்கையாழ்வார்-பெரிய திருமொழி- iii-4-9)

5. மாகத்திளமதியம் சேரும் சடையானை
பாகத்துவைத்தான்றன் பாதம் பணிந்தேனே.
(நம்மாழ்வார்-திருவாய்மொழி, x-4-6)

6. மாதாயமாலவனை .... மாதவனை.
(திருமழிசையாழ்வார்-இயற்பா-65)

A Combodia inscription of Jayavarman VII (1189-1195 A.D.) contains the idea in the following verse —

वन्दे कुशेशयदृशं सदृशं शिवेन
संप्रत्ययेन महतां महसां महिम्ना ।
अर्धेन्दुधारिवपुषा सुरसाधितेन
प्रापाम्बिकाङ्गमिव यस्य शरीरमैक्यम् ॥

Indravarma (877-889 A.D.) of Combodia ordered a Hari Hara Murti to be moulded and this is stated by a poet of that country —

अभिन्नतन्वोरीशानशार्ङ्गिणोः प्रतिरूपकम् ।
कृत्वा तत्स्थापनविधौ तनयान् सोऽप्ययोजयत् ॥

Sri Sankaracharya in his Bhashya on Sri Bhagavadgita Chapter XIV verse 27 corroborates the synthesis — यया च ईश्वरशक्त्या भक्तानुग्रहादिप्रयोजनाय ब्रह्म प्रतिष्ठते प्रवर्तते सा शक्तिः ब्रह्मैवाहं शक्तिशक्तिमतोरनन्यत्वादित्यभिप्रायः ।

Sri Sankara's Authoritative diction.

Public domain. Digitization Muthulakshmi Research Acade

On the question of the date of Sri Appayya Dikshita, I contributed two articles to the Oriental Research Journal of Madras in 1928 and 1929 and dealt with the subject elsewhere also. I tried to prove the untenability of the long accepted date of 1553 to 1623 A. D. based on a horoscope paraded by Kadayam Sesha Dikshitar (same as Sivanandayati of Kalahasti) in his works, but which in fact was only a Nashta Jataka Ganita. I propounded on the strength of a reliable tradition recorded by my great-grand-father, Mahamahopadhyaya Brahmasri Raju Sastrigal of Mannargudi, the date 1523 to 1593 A. D. and endeavoured to support this date with the citation of historical, inscriptional, literary and internal evidences so solid and genuine to my mind as should set at rest all controversy over the matter. I am much gratified to note that several veteran scholars have not thought fit to re-open the question since, though to my great regret there are still many writers who continue to refer to the discredited date, presumably due to their unawareness of its having been superseded.

But Professor P. P. S. Sastri made an abortive attempt to interpret the dated inscription of Adayapalam edited by me in the above

ublic domain. Digitization Muthulakshmi Research Acade

said J. O. R. article, in such a way as not to be a conclusive evidence in support of my date, and Professor S. S. Suryanarayana Sastry sided with him with a kindred suspicion of my theory. The former trotted out a novelty in the shape of 1558 A. D. as the date ot Sri Dikshita's birth without stopping to think of the stultifying implications involved in so sliding down the date. His brother Professor however has not lent his weight to this amusing alternative. Both the professors have discreetly desisted from reiterating the original date based on the horoscope, and yet, in dissenting from my view, have not cared to bother themselves with any earnest examination of the soundness or otherwise of my discussions of the dates of the several royal patrons of Sri Appayya Dikshita and of his well-known literary contemporaries, which have made my conclusion inevitable. I therefore venture to think that their sceptic attitude towards my theory is only a reflex of an over-cautiousness about their falling in with an unconstituted and amateurish debut in the field of research.

The Ratna Traya Pariksha was long ago printed in Grantha characters and had since become rare. Sri M. V. Pranatartihara Sastrigal

Public domain. Digitization Muthulakshmi Research Acade

of the Seshadri Press, Mysore has done a great service to the scholarly world in having brought out this neat edition of the work. His dedication of the work to His Holiness the Jagadguru of the Kanchi Kamakoti Pitha is not only apt but also significant. His Holiness is inspired by the same spirit of synthesis and reconciliation as the great Dikshita in this age of short-sighted cliques and supercilious seperatism due to priggish pretentions to self-righteousness and consequent lack of accommodating generosity of out-look.

This edition of the work.

Its Dedication.

In conclusion let me pray that His Holiness's blessings may always protect and guide me, and also thank the publisher for having accorded to me the privilege of writing the introduction to this work.

Conclusion.

MAYURAM
18–3–1952

Y. MHALINGA SASTRI.

ublic domain. Digitization Muthulakshmi Research Acad

Public domain. Digitization Muthulakshmi Research Acade

उपोद्घातः

सर्वतन्त्रस्वतन्त्राय सदात्माद्वैतवादिने ।
श्रीमते शंकरार्याय वेदान्तगुरवे नमः ॥

इह खलु धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु चरमपुरुषार्थ एव परमः पुरुषार्थः । स च परमपुरुषार्थः वेदान्तवाक्यार्थशुद्धाद्वैतज्ञानसाध्यः । तादृशपरमपुरुषार्थसाधनीभूतवेदान्तार्थात्मज्ञानमार्गे नानादुर्मतमदान्धैरवैदिकैः खलैः खिलीकृते भूयसा कलियुगे, सकललोकसंरक्षणाय परमकारुणिको नारायणीजानिः शीतांशुशेखरः सर्वविद्यानामीशानः भगवत्पादरूपेणावतीर्य, वेदान्तवाक्यानामात्माद्वैतबोधकत्वसंशयाविष्टानां मन्दमतीनां शंकावारणाय सूत्रितानां वेदान्तार्थात्माद्वैतसूचकानां सूत्राणां भगवता महर्षिणा वेदव्यासेन व्याख्यारूपेण वेदान्तवाक्यार्थात्माद्वैतडिण्डिमोद्घोषघोषणेनैव द्विसप्ततिदुर्मतान्दूरीकृत्यात्माद्वैतं सयुक्तिकं सप्रमाणं सम्यक् संस्थाप्य मन्दाधिकारिणामप्युज्जीवनाय परमकरुणया परममुक्तिहेतुभूतानि षण्मतानि उपासनारूपाणि चानुगृह्य स्वे महिम्नि प्रतिष्ठितो विराजतेतराम् ।

तदनन्तरं बहोः कालात् बहुभिः वेदार्थानभिज्ञैः वैदिकमर्यादानभिज्ञैः चापण्डितैः मूर्खैः पुनरपि कलुषीकृते सन्मार्गे तद्रक्षणाय श्रीमच्छङ्करभगवत्पादापरावतारभूतानां विश्वजिदाद्यनेकयागयाजिनां सकलवेदवेदान्तेतिहासपुराणादिषु दर्शनषट्कादिषु च अप्रतिहतप्रज्ञानां सर्वतन्त्रस्वतन्त्राणां अ, प्प, य इत्यनुगृहीतनामाक्षराणां दीक्षितेन्द्रा इत्येव दिगन्त

ublic domain. Digitization Muthulakshmi Research Acade

विख्यातानां महात्मनामवतारः माकिं चतुःशतसंवत्सरेभ्यः प्राक् अडयप्पल्लाभिधानाग्रहारे सुमनोभिरामे समभवत् । परमकारुणिकाः ते च दीक्षितेन्द्राः परमकरुणया चतुरधिक-शतसंख्याकान् भिन्नभिन्नप्रस्थानानत्युत्कृष्टान्ग्रन्थान्विरच्य द्वैत --विशिष्टाद्वैत – शैव–अद्वैत मतानुवर्तिनां सकलसज्जनानां महोपकृतिमकार्षुः। तेष्वन्यतमोऽयं रत्नत्रयपरीक्षाख्यो ग्रन्थः । अस्मिन्ग्रन्थे, भगवत्पादप्रतिष्ठापितानां षण्णां मतानां मध्ये शिरोरत्नायमाणेषु शाक्त वैष्णव शैवेषु त्रिषु मतेषु परत्वेन प्रतिपाद्यमानानां उमा, विष्णुः, शिवश्चत्येतेषां त्रयाणां रत्नानां परीक्षा विवेचनं परापरत्वज्ञानं अखण्डब्रह्मकोटिप्रविष्टत्व निरूपणं वैदिकप्रमाणैर्युक्तिभिः अभियुक्तवचनचयैः श्री श्रीकण्ठाचार्याणां भाष्यवचनप्रमाणैश्च सम्यगुपवर्णितम् ।

इतः त्रिंशतस्संवत्सरेभ्यःपूर्वं कस्माच्चित्साधुतमात्ब्राह्मणात् दीक्षितेन्द्रविरचितग्रन्थनामगणनावसरे रत्नत्रयपरीक्षाख्य ग्रन्थस्य नामाश्रौषम् । तैःकृतरामायणसारसंग्रह–महाभारत-तात्पर्यनिर्णयाख्यविख्यातग्रन्थपठनेन अनुभूतानन्दस्य मम रत्नत्रयपरीक्षायाः दर्शने पठने च उत्कण्ठा द्विगुणिता आसीत् । तत्कोशगवेषणाय पण्डितप्रवरान्परिपृष्टवतो मम तैस्तैः एतानि वाक्यनि प्रत्युत्तरीकृतानि, तथा हि कैश्चित् यथार्थवादिभिः तन्नाम न श्रुतपूर्वम् , अन्यैस्तु नाम तु श्रुतपूर्वं अथापि न पठितम्, अपरैः ग्रन्थस्तु पठितः प्रतिपाद्यो अर्थः ब्रह्मविष्णुमहेश्वराः, अपरैः मयि ग्रन्थः आसीद्यस्मै कस्मैचिद्दत्तो न प्रतिनिवृत्तः, इतरैः तु तत्र विचार्यतामत्र

Public domain. Digitization Muthulakshmi Research Acade

विचार्यतामिति, तादृशवचनश्रवणानन्तरं मम कोशान्वेषण-प्रवृत्तेः कुण्ठितत्वाद्रत्नत्रयपरीक्षायाः नाम विस्मृतमासीत् ।

तदन्तरे एकदा श्रीकांचीकामकोटिपीठप्रेष्ठाधिष्ठानं समधिष्ठितैः साधिष्ठैः सुरधुनी नीकाश निरन्तरनिर्गलन्मधुमधुर मृदुवाग्झरीविलाससमलंकृतैः चक्षुष्मतां चक्षुःपचेलिमभागधेयैः श्रीत्रिपुरसुन्दरीमधिकृत्यापामरावबोधक्षममुपन्यस्यद्भिः श्रीगुरुचरणैः, इतरसहस्रनामस्तोत्रेषु विद्यमानो नाम्नांपुनरुक्तिरूपदोषो श्रीललितासहस्रनामस्तोत्रे नास्तीति प्रसंगात् स्त्रैणपौंस्नादि नाना भक्तजननिविडीकृते उपन्यासमण्टपे उपन्यस्तमुपश्रुत्य, उपसृत्य च श्रीस्वामिपादान् मिथः कुतूहलात् जिज्ञासयाहं सविनयमपृच्छम्, कथंनु भगवन् इति। आदिष्टश्चाहमनुपदमेव श्रीचरणैः श्रीललितासहस्रनामभाष्योपोद्घातग्रन्थोऽवलोक्यतामिति। ओं इति। अनन्तरं श्रीललिता सहस्रनामभाष्योपोद्घातावलोकनेन मम निवृत्तः संशयः, अथापि पुनः तद्भाष्यं उपर्यप्यपठंमामूलाग्रमासेचनकम् ।

तदा पञ्चविंशतिंवर्षाणि विस्मृतरत्नत्रयपरीक्षानामकग्रन्थनाम्नो मम गुर्वनुग्रहपूर्वकेश्वरानुग्रहात् पुनः तन्नाम भास्कररायमहाशयैः वाग्देव्यनुग्रहवशाद्वशीकृतसर्वशास्त्रैः निखिलमन्त्रशास्त्रज्ञैः विरचितश्रीललितासहस्रनामभाष्यपठनात्स्मारितम्। तैः कृत सौभाग्यभास्कराख्ये भाष्ये भावनागम्या, पद्मनाभसहोदरी, ईं, इत्येतेषां नाम्नां व्याख्यानावसरे पर्यायेण लिखितानि वक्ष्यमाणान्येतानि वाक्यानि स्वोक्ति-

ublic domain. Digitization Muthulakshmi Research Acade

प्रामाण्यसाधकानि संदृष्टानि । यथा 'एतल्लक्षणनिष्कर्षश्च रत्नत्रयपरीक्षायां दीक्षितैः कृतस्तत एवावगन्तव्यः', 'एतत् त्रयमपि मिलित्वैकमखण्डं ब्रह्मेति शैवमतरहस्यं कूर्मपुराणादिषु प्रसिद्धं रत्नत्रयपरीक्षायां दीक्षितैर्विस्तरेणनिरूपितम्', 'एतत्त्रयमपि मिलित्वैकमखण्डं ब्रह्मेति शैवमतप्रक्रिया कूर्मपुराणाद्यनुयायिनी रत्नत्रयपरीक्षायां दीक्षितैर्विस्तरेण निरूपितानुसंधेया' इति, तत्रत्यनिरुपपद दीक्षितपदेन तन्नाम्नो महत्वं, दीक्षित इत्येव जगद्विख्याततत्वं, अनेकानितरसुलभयागयाजित्वं, शैवमतरहस्यं, कूर्मपुराणप्रसिद्धं, शैवमतप्रक्रिया कूर्मपुराणाद्यनुयायिनीत्यादिना तेषां कूर्मपुराण शैवागमानां हृदयज्ञत्वं, विस्तरेण निरूपितं विस्तरेण निरूपितेत्यादिना तेषां तत्तत्पुराणाशयं सुललितं बाधकनिरासपूर्वकं सम्यगुपपादनसामर्थ्यं, तत एवावगन्तव्यः अनुसन्धेया इत्यादिना शैवागमकूर्मपुराणानामाशयज्ञानाभिलाषिभिरवश्यं रत्नत्रयपरीक्षायाः पठनीयत्वं, एवकारेण ग्रन्थान्तरपठनेन विविक्षितार्थालाभः, रत्नत्रयपरीक्षेतिपदेन एतत्ग्रन्थस्यात्युत्कृष्टत्वं सुप्रसिद्धत्वं, प्रामाणिकत्वं, सद्भिरङ्गीकृततत्वं इत्यादि व्यञ्जयन्ती वाक्यानि दृष्टवतो मम रत्नत्रयपरीक्षायाः पठनाकङ्क्षा पुनः प्रादुरासीदप्रतिहता ।

पुनरपितत्कोशगवेषणाय यतमानोऽहं बहुषुस्थलेषु पण्डितप्रवरेषु च विचित्य तदलाभात्क्लान्तोऽभवम् । अन्ततः महाशयैः श्री वि. कृष्णस्वामिऐयर्वर्यैः स्थापिते मदरास् पत्तनस्थ

Public domain. Digitization Muthulakshmi Research Acade

सुप्रसिद्धमैलापूर्संस्कृतविद्यालये वेदान्तशास्त्रप्रधानाध्यापकानां पोलहं श्रीरामशास्त्रिवर्याणां कृपया संप्राप्तः । तल्लाभात् कोशगवेषणकाले यावद्दुःखमन्वभवं ततः शतगुणं, सहस्रगुणं, अथवामितगुणमानन्दम् । तदपि बहुपुस्थलेषु अक्षराणामनतिस्फुटत्वाद्विपरीततया मुद्रितत्वाच्च दीक्षितेन्द्राणामाशयावगमे आयासबाहुल्यमासीत् । कथमपि दीक्षितेन्द्राणामाशयमवबुद्धस्य मम कोशस्यास्य संशोध्य मुद्रणे बुद्धिराविरासीत् । महीसुरपुरविद्यमानानां पण्डितरत्नं नवीनं श्रीवेङ्कटेशशास्त्रिणाममूल्यसाह्येन महीसुरपुरराजकीयकोशागारस्थतालपत्रसाहाय्येन च यथामति संयक्संशोध्य श्रीकांचीकामकोटिपीठाधिपानां लोकानुग्रहार्थमेव कृतावताराणां सकलजीवराशीनां उज्जीवनोपायमनवरतमनुध्यायतां श्रीगुरुचरणानामाज्ञानुग्रहबलेन च स्वकीयमुद्राक्षरशालायां मुद्रयित्वा प्रकाशितः सतां पडिण्तवर्याणां प्रमोदाय ।

कुतूहलातिशयेन वक्तव्यं यदेतत् । श्रीदीक्षितेन्द्रवंश्यैः सदाचार्यत्वेनाभिमतानां श्रीयज्ञस्वामिशास्त्रिणां त्यागराजमखिराजवर्यपौत्राणां पुत्ररत्नैः श्रीदीक्षितेन्द्र इव सारासारविवेचपटुतरैरालोडितानेकग्रन्थचयैःआंग्लभाषायामपि प्रवीणैः M. A., B. L. उपाधिसमलंकृतैः स्पृहणीयगुणान्वितैः शान्तैश्च श्रीमहालिंगशास्त्रिभिः स्वामूल्यकालव्ययमपि अविगणय्य रचित विशेष विशद विस्तृताङ्गलभाषोपोद्घातदानेनानेन धन्यमात्मानं मन्यमानोऽहं धन्यवादान्समर्पयामि तेभ्यः ।

ublic domain. Digitization Muthulakshmi Research Acade

ग्रन्थस्यास्यसंशोधने कष्टतरे कर्मणि कष्टेन कष्टमविगणय्य सहकृतवातां तत्र भवतां श्रीमतां पंडितरत्नं नवीनं श्रीवेंकटेशशास्त्रिणां, पूर्वं ग्रन्थलिप्या मुद्रितकोशदानेन महदुपकृतवतां पोलहं श्रीरामशास्त्रिणां च नतीरुपहारीकरोमि ।

तनीयसो ममानन्दाश्रुतोयसहितमुपहारीकृतमिदं पत्रमपि प्रीत्या प्रतिगृह्य स्वात्मानन्दास्वादस्वान्ताः श्रीगुरुचरणाः 'सन्तुष्टा वयमिति' असाधारण्या गैर्वाण्या वाण्या अमृतासारवर्षिण्या मामभ्यषिञ्चन् । तज्जनितानन्दातिशयेनोत्कण्ठारुद्धकण्ठो किञ्चिदपि प्रतिवक्तुमसमर्थो मूकीभूतोऽहं, पर्याप्तकामानां किंचिदपि प्रतिक्रियामलभमानोऽन्ते आनिनंसया भूमौ दंडवन्निपतितोस्मि ।

श्रीवेंकटेश ऐयर् प्रमुखानां बहूनां साह्यं कृतवतां मन्मित्राणां कृतज्ञताविष्करणेन ममाधमर्णतामधरीकरोमि ।

सन्तः सहृदयाः विपश्चितामपश्चिमाः विपश्चितः मानवमात्र धर्मेण प्रमादेन संभावितान् मुद्रणदोषान् अणूकृत्य महीकृत्य च मम महान्तं परिश्रमं महार्हग्रन्थप्रकटनेन संजातं मां अभिनन्दयिष्यन्तीति दृढं विश्वसिमि । किंच तेषां सतां सविधे सविनयं समभ्यर्थये यद्यत्र दोषाः समुपलभ्येरन् तान् मह्यं सूचयितुं द्वितीयमुद्रणपरिष्करणोपयोगि ।

खर सं., पुष्य १२

सज्जनविधेयः
प्रणतार्तिहरः

Public domain. Digitization Muthulakshmi Research Acade

समर्पणम्

श्रीजगद्गुरु
श्रीकाञ्ची कामकोटि पीठाधीश्वर
श्रीमच्चन्द्रशेखरेन्द्र सरस्वती पादानां
पादयोः समर्पिता
इयं

रत्नत्रयपरीक्षा

विनीतेन प्रियशिष्येण
प्रणतार्त्तिहरेण ता

ublic domain. Digitization Muthulakshmi Research Acade

Public domain. Digitization Muthulakshmi Research Acade

॥ श्रीगुरुभ्योनमः ॥

॥ रत्नत्रयपरीक्षा ॥

श्रीमदप्पयदीक्षितेन्द्र विरचिता रत्नत्रयपरीक्षा प्रारभ्यते ।

नित्यं निर्दोषगन्धं निरतिशयसुखं ब्रह्मचैतन्यमेकम्
धर्मोधर्मीतिरूपद्वयमयति पृथग्भूय मायावशेन ।
धर्मस्तत्रानुभूतिस्सकलविषयिणी सर्वकार्यानुकूला
शक्तिश्चेच्छादिरूपा भवति गुणगणश्चाश्रयस्त्वेक एव ॥ १ ॥

रत्नत्रयपरीक्षेयमष्टश्लोक्यतिनिर्मला ।
श्रीमत्साम्बशिवप्रीत्यै संक्षेपेण प्रकाश्यते. ॥

नित्यं दोषगन्धेनापि रहितं निरतिशयसुखात्मकमद्वितीय ब्रह्मचैतन्यं माययाकल्पितभेदं सद्धर्मधर्मिभावं प्राप्नोति, — जीवब्रह्मविभागवत् अनादिरयं धर्मधर्मिविभागोऽपि। तत्र धर्मः स्वप्रकाशरूपस्य धर्मिणः परब्रह्मणः सकलप्रपंचविषयाऽनुभूतिर्भवति — तदुक्तं श्रीकूर्मपुराणे शिवेनैव, "तयाऽहं संगतो देव्या केवलो निष्कलः परः । पश्याम्यशेषमेवेदं यस्तद्वेद समुच्यते" इति। स एव धर्मस्तस्य सकलकार्यानु-

Public domain. Digitization Muthulakshmi Research Academy

कूला शक्तिस्सर्वोपि गुणगणश्च भवति । तदुक्तं श्वेताश्वतरोपनिषदि "परास्यशक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रियाच" इति, — अस्य शक्तिरेव स्वाभाविकी स्वभावमायाविभागप्राप्ता ज्ञानरूपा बलरूपा कृतिरूपा चकारादिच्छारूपाचेत्यर्थः । बलं नाम प्रयत्नमनपेक्ष्यांगुल्यग्रादिनापि महापर्वतादि धारणानुकूलो गुणः । धर्मज्ञानरूपा शक्तिः सैव धर्मिणः सकलगुणाद्यात्मिका चेत्यभियुक्ता अप्याहुः, "शक्तिः शरीरमधिदैवतमन्तरात्मा ज्ञानं क्रियाकरणमानसजालमिच्छा । ऐश्वर्यमायतनमावरणानि च त्वं किंतन्नयद्भवसि देवि शशाङ्कमौलेः ॥" इति ।

अस्यैव धर्मज्ञानस्य महिमानमुपनिषत्सिद्धं प्रपंचयति ।

वेदज्ञाधर्ममेतं प्रविततमखिलाधारमाकाशमाहुः
किंचानन्दं मनोवागविषयमधिकं धर्मिणो वर्णयन्ति ।
सत्तास्फूर्तिस्सुखं च त्रयमपि जगतां संगिरन्ते तदंशं
प्राणाकाशाद्युपास्तीः कतिचिदपि तदालम्बनास्ते वदन्ति ॥

बृहदारण्यकोपनिषदि "यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक् पृथिव्या यदन्तराद्यावापृथिवी इमे यद्भूतंच भवच्च भविष्यच्चेत्याचक्षते कस्मिंस्तदोतंचप्रोतंच" इति गार्ग्यापृष्टेन याज्ञवल्केन "आकाश एव तदोतंच प्रोतंच" इत्यभिहिते "कस्मिन्नुखल्वाकाश ओतश्च प्रोतश्च" इति पुनस्तयापृष्टेन तेन "एतद्वैतदक्षरं गार्गि ब्राह्मणा अभिवदन्ति" इत्यादिनाऽक्षरशब्दितं सर्व-

Public domain. Digitization Muthulakshmi Research Academy

इत्यादि विशिष्टं ब्रह्म प्रतिपाद्य 'एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च' इत्युत्तरमभिहितम्। तत्र आकाशो न भूताकाशः तस्य परिच्छिन्नस्य प्रतिकल्पं भिन्नस्यच सकलदेशकालवर्ति सकलप्रपंचाधारत्वायोगादतो धर्मज्ञानरूपा चिदम्बरशक्तिरेव आकाश इत्यवसीयते । तत्रासमन्तात्प्रकाशयति सर्वप्रपंच-मवभासयतीति परब्रह्मणः सर्वविषयज्ञानरूपावयवार्थानुगति-सद्भावात् । "यस्य सा परमादेवी शक्तिराकाशसंज्ञिता। अनन्तैश्वर्य योगात्मा महेशो दृश्यते हि सः ॥" इति श्रीकूर्म-सूक्त्या तस्या आकाशशब्दवाच्यत्वावगमाच्च। एवं छन्दोगोप-निषद्यपि मंत्रभागे "ऋतं सत्ये प्रतिष्ठितं भूतं भविष्यतासह" इति भूतभविष्यद्वर्तमानात्मकसकलप्रपंचाधारत्वेनप्रकृते सत्ये 'आकाश उपनिरज्जतुमह्यमन्नमथोश्रियम्' इत्याकाश शब्दप्रयो-गेनाक्षरधर्मिको बृहदारण्यकोक्त आकाश एवायं जगदाधार इत्यवसितं। अत्र ऋतशब्देन अवितथवाचिना तादृग्विषय-तया निश्चितत्वात् पारिशेष्याच्च वर्तमानमुक्तम्। अयंचाकाशो भूताकाशादन्य इत्यनन्तरमेव स्फुटीकृतः । "आकाशस्यैष आकाशो यदेतत् भातिमण्डलम्" इत्यत्र प्रकृतवाचिनैतच्छब्देन प्रकृतमाकाशं परामृश्य सुप्रसिद्धाकाशस्याप्याकाश इत्युक्त्या मन्मथस्यापि मन्मथ इत्युक्त्या मन्मथान्तरवत् आकाशान्तरं प्रतीयते। तत्रैव "आकाशो हवै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तत् ब्रह्म" इति निर्विकारतया नामरूपास्पृष्टात् ब्रह्मणो वैलक्षण्येन नामरूपनिर्वोढृतया प्रतिपादितः आकाशोऽपि तद्धर्म-भूता चिदम्बरशक्तिरेव, तत्र आकाशनामनिरूढ्यवगमात् ।

Public domain. Digitization Muthulakshmi Research Acade

एवं तावद्वाजसनेयिनश्छन्दोगाश्च धर्मज्ञानरूपां चिदम्बरशक्तिं सर्वाधारं सर्वकारणमाकाशमाहुरितिस्थितम्। तैत्तरीयास्तामेव वाङ्मनसातीतं परब्रह्मणो निरतिशयमानन्दमाहुः । "यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् । न बिभेति कदाचनेति"। अत्र हि ब्रह्मगते परमानन्दे "यदेष आकाशआनन्दो न स्यात्" इत्याकाशशब्दसामानाधिकरण्यादस्य चिदम्बररूपत्वमवसीयते । तत्र "यदेषइति" प्रकृतानन्दमयपरैतच्छब्दसामानाधिकरण्येपि न कश्चिद्दोषः। आनन्दमयोपि सैव चिदम्बरशक्तिरित्यङ्गीकारात् , आनन्दमय शब्दोपि प्रचुरमानन्दमाचष्टे न तु प्रचुरानन्दविशिष्टधर्मिणम् । "तत् प्रकृतवचने मयट्" इति सूत्रस्य ह्यन्नमयी वर्तते यवागूमयं वर्तते इत्याद्युदाहरणानां प्रचुरमन्नं वर्तते प्रचुरा यवागूरित्यादिरर्थश्शाब्दिकैर्विवक्षितः । अन्नमयो यज्ञ इत्याद्युदाहरणानां तु सूत्रस्यार्थान्तरमाश्रित्याङ्गीकृतानां प्रकृतं प्रस्तुतमन्नमस्मिन्यज्ञ इत्यादिरेवार्थस्तैरङ्गीकृतः न तु तस्मिन्नर्थे प्राचुर्यानुप्रवेशस्तेषामभिमतः। इहचावश्यम् प्राचुर्यविवक्षयाभाव्यम् मयडर्थप्राचुर्यविवरणार्थतयैवाग्रिमानन्दमीमांसाप्रवृत्तेः । सचानन्दमयशब्दोक्तः प्रचुरानन्दः परब्रह्मधर्मिक इत्येतदग्रिमात् "स एको ब्रह्मण आनन्दः" "आनन्दं ब्रह्मणो विद्वान्" इत्यतस्सिध्यति । न च "सत्यं ज्ञानमनन्तं ब्रह्म" इति प्रकृते ब्रह्मणि निरूपणीये तद्धर्मरूपस्य प्रचुरानन्दस्य प्राधान्येन निरूपणं प्रकृताऽसंगतमिति वाच्यं, सत्यं ज्ञानादिमंत्रोदितगुहारूपतया अन्नमयादि

Public domain. Digitization Muthulakshmi Research Acade

कोशचतुष्टयनिरूपणं ब्रह्मपुच्छं प्रतिष्ठेति तटस्थब्रह्मनिरूपण-मित्यादिप्रकारेण सर्वस्याप्यग्रिमसंदर्भस्य सत्यज्ञानमंत्रार्थ विवरणतया सङ्गतेः, तथा 'सदेवसोम्येदमग्र आसीत्' इत्य-धीयानाश्छन्दोगाः घटस्सन् पटस्सन् इति प्रतीयमानां प्रपंच-सत्तां चिच्छक्त्यात्मकब्रह्मसत्तांशरूपामावेदयन्ति । इदं हि वाक्यं घटशरावादिकमिदं पूर्वाह्णे मृदेवासीदिति लौकिक-वाक्यतुल्यच्छायम्, ततश्च यथा घटशरावादिषु मृत्त्वप्रतीतिः पूर्वाह्णे दृष्टमृत्कूटगतमृदेकदेशानुस्यूत्यालम्बना तेन लौकिक वाक्येनसिध्यति, एवं घटपटादिसत्ताप्रतीतिरपि ब्रह्मसत्तां-शानुस्यूत्यालम्बना सदेवेत्यादिवाक्येन सिध्यति, एवमाथ-र्वणाः "तस्य भासा सर्वमिदं विभाति" इति आमनन्तः घटः स्फुरति पटः स्फुरतीति प्रतीयमानप्रपञ्चस्फुरणं ब्रह्मभानरूप-तदीयशक्त्यंशमावेदयन्ति । नच तत्र स्फुरतीत्यस्य स्फुरणविषयत्वमर्थः, सविता स्फुरति भाति प्रकाशत इत्यादिप्रोयोगे स्फुरणवत्वार्थकस्य तस्य घटः स्फुरतीत्यादि-प्रयोगे अर्थान्तरकल्पनाऽयोगात् । नच ब्रह्मभानस्य सर्व-साधारण्यान्ममस्फुरति मम न स्फुरतीति व्यवहारानुपपत्तिः, प्रतिनियततत्तत्पुरुषचाक्षुषज्ञानाद्यभिव्यक्तस्य ब्रह्मभान-रूपस्य स्फुरणस्य प्रतिनियतव्यवहारविषयत्वोपपत्तेः, तथा "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति पठन्तो वाजसनेयिनः वैषयिकादिसुखवृत्तिषु विषयविशेष-संपर्कादिकारणवशात् तारतम्येनाभिव्यक्तः परब्रह्मानन्दरूप-

Public domain. Digitization Muthulakshmi Research Acade

चिच्छक्त्यंश एव जीवैरास्वाद्यतइत्यावेदयन्ति । तथा तैत्त-रीया अप्यानन्दमीमांसायां 'यदेष आकाश आनन्दो नस्यात्' इति प्रकृतमेव ब्रह्मानन्दम् "स एको मानुष आनन्दः" इत्यादिसन्दर्भे तारतम्यापन्न मानुषाद्यानन्दत्वेनाधीयमाना उक्तमर्थमावेदयन्ति । तथा छन्दोगादयः प्राणाकाशादि-विषयोद्गीथादिविद्याः चिच्छक्तिविषया निबध्नन्ति । तासु विद्यासु "सर्वाणि हवा इमानि भूतानि प्राणमेवाभिसंवि-शन्ति प्राणमभ्युज्जिहते सर्वाणि हवा इमानि भूता-न्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ति" इति सकलभूतोत्पत्तिलयाधारत्वेन तदुपादानत्वप्रतीतेः । कूटस्थे ब्रह्मणि तदयोगात् । "को ह्येवान्यात्" इत्यादिश्रुत्यनु-सारेण सकलप्राणनहेतौ चिदस्वरशक्तिरूपे धर्मे प्राणाकाश-शब्दयोरुपपत्तेश्च ॥

एवं धर्मस्य महान्तं महिमानं प्रदर्श्य धर्मिणो धर्मस्य च कृत्यविभागं दर्शयति ॥

कर्तृत्वं तस्य धर्मी कलयति जगतां पञ्चके सृष्टिपूर्वे
धर्मः पुंरूपमाप्त्वा सकलजगदुपादानभावं बिभर्ति ।
स्त्रीरूपं प्राप्य दिव्या भवति च महिषी स्वाश्रयस्यादिकर्तुः
प्रोक्तौ धर्मप्रभेदावपि निगमविदां धर्मिवत् ब्रह्मकोटी ॥

Public domain. Digitization Muthulakshmi Research Acade

सृष्टिपालनसंहारतिरोधानानुग्रहरूपाणि पञ्चकृत्यानि, तिरोधानानुग्रहौ बन्धमोक्षौ, एतेषु विश्वस्य सृष्ट्यादिषु धर्मी केवलकर्ता भवति, धर्मस्तु पुरुषवनितारूपेण विभागं प्राप्य पुरुषरूपेण विश्वस्योपादानं भवति, वनिता-रूपेण धर्मिणः परब्रह्मणः दिव्या महीषी भवति, ते च पुरुष-वनिते अस्मादादिवन्न जीवकोटी, किन्तु ब्रह्मकोटी इति ब्रह्म-विदां सिद्धान्त इत्यर्थः । ननु ब्रह्मधर्मस्य ज्ञानानन्देच्छा-दिगुणरूपस्य वह्निगतदहनादिशक्तिवत् ब्रह्मगतसृष्ट्यादि-शक्तिरूपस्य च कथं स्वतन्त्रचेतनत्वम्, येन तस्य पुरुष-वनितारूपो विभागस्स्यात् । उच्यते—यथैकस्यैव ज्ञानानन्दे-च्छाद्यानेकगुणरूपत्वम्, एवं धर्मिणंप्रति तथाभूतस्यापि स्वतस्तावद्गुणगणविशिष्टस्वतन्त्रचेतनत्वमप्युपद्यते । अत एव "ते ध्यानयोगानुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्नि-गूढाम्" इति श्वेताश्वतरमन्त्रे देवस्य परब्रह्मणः शक्तौ आत्म-त्वविशेषणम्, "अन्योन्तर आत्मानन्दमयः" इति आनन्द-वल्यामात्मत्वनिर्देशश्च । बृहदारण्यके गार्गिब्राह्मणे पृथिव्यादि ब्रह्मलोकान्तेषु पूर्वपूर्वं प्रति उत्तरोत्तरस्याधारत्वोक्त्यनन्तरं 'कस्मिन्नुखलु ब्रह्मलोका ओताश्च प्रोताश्च' इति पुनः गार्ग्या-पृष्ठेन याज्ञवल्क्येन "गार्गि मातिप्राक्षीर्मा ते मूर्द्धा व्यप-सदनतिप्रश्न्यां वै देवतामतिपृच्छसि' इति तत्रात्मत्वावान्तर विशेषरूपदेवतात्वनिर्देशश्च । तत्रहि ब्रह्मलोकानामोतप्रोत-त्वं परमाकाशे वर्णनीयम् । सा परा देवता गुरूपसदना-दिनियममतिक्रम्य प्रष्टुमनर्हा तमतिक्रम्य तां मा प्राक्षी-

Public domain. Digitization Muthulakshmi Research Acade

रिति, तत्र देवतापदं वक्ष्यमाणपरमाकाशपरं प्रयुक्तम् । अतो धर्मस्य सतस्स्वतन्त्रचेतनत्वमप्युपपद्यत एव ॥

नन्वस्तु तथा — तयोः पुरुषवनितयोः ब्रह्मकोटित्वं कुतोऽवसीयत इत्याकाङ्क्षायामाह ॥

योऽसौ धर्मी स शंभुस्स शिव इति परंब्रह्मचेति प्रसिद्धो
याचोक्ता धर्मिणोस्याविघटितमहिषी साम्बिकोमेति वित्ता।
यश्चोपादानभूतः पर इह पुरुषश्चैष नारायणोक्त्या
ख्यातः श्रीकूर्मवाक्यैरधिगतमिदं नारदस्यापि वाक्यैः ॥

र-सम।

अत्र शिवो धर्मी । तद्धर्मावुमानारायणौ । तावपि ब्रह्मकोटी इत्यत्र गमकानि श्रीकूर्मवचनान्युदाहरिष्यामः । तत्र मन्दरशिखरिण्युमासंरक्षणार्थं विष्णुं नियोज्य देवदारुवनं गत्वा तत्र तपस्यतोऽनुगृह्य मन्दरं प्रतिनिवृत्तः शिवः तत्र सिंहासने गौर्या नारायणेन च सहोपविष्टो देवर्षिगन्धर्वादिभिस्सेव्यमानाङ्घ्रिरास्तेति प्रस्तुत्य 'दृष्ट्वा सिंहासनासीनं देव्या नारायणेन च । प्रणम्य देवमीशानं पृष्टवत्योवराङ्गनाः ॥ कस्त्वं विभ्राजते कान्त्या केयं बाला रविप्रभा । कोन्वसौ भाति पुरुषः पङ्कजायतलोचनः ॥' इति कासाञ्चिद्देवकन्यानां प्रश्नमुपन्यस्य तत्र शिवस्योत्तरवचनानि दर्शितानि ।

Public domain. Digitization Muthulakshmi Research Acade

'अयं नारायणो गौरी जगन्माता सनातनी । विभज्याहं स्थितो देवः स्वात्मानं परमेश्वरः ॥ न मे विदुः परं तत्वं देवाद्या न महर्षयः । एकोऽहं वेद विश्वात्मा भवानी विष्णुरेवच॥ अहं हि निष्क्रियो धाता केवलो निष्परिग्रहः । मामेव केशवं देवमाहुर्देवीमथाम्बिकाम् ॥' इत्येवं शिवेन गौरी-नारायणयोः स्वाभेदमुक्त्वा तयोः स्वधर्मरूपभेदात्मत्वं अनन्तरमेवाविष्कृतम् — 'कूटस्थोह्यक्षरोव्यापी योगी नारायणाह्वयः । तारकः पुरुषोह्यात्मा केवलं परमं पदम् ॥ सैषा माहेश्वरी गौरी मम शक्तिर्निरञ्जना । शान्ता सत्या सदानन्दा परंपदमिति श्रुतिः ॥' इति । अत्र परमपद-शब्देन ब्रह्मधर्मरूपपराशक्तिः व्यवह्रियेते । अतस्तयोरु-भयोरपि परमपदत्वोक्त्या तद्रूपभेदत्वमाविष्कृतम् ॥ तथा पुत्रार्थं कैलासेकृततपश्चरणाय कृष्णायाभिमतवरे दत्ते गौरी-वचनम् । 'वत्स जाने तथानन्तां निश्चलां सर्वदाच्युत । अनन्यामीश्वरे भक्तिमात्मन्यपि च केशव ॥ त्वं हि नारा-यणस्साक्षात्सर्वात्मा पुरुषोत्तमः । प्रार्थितो दैवतैः पूर्वं सञ्जातो देवकीसुतः ॥ पश्य त्वमात्मनात्मानममलं परमं पदं । नावयोर्विद्यते भेद ऐक्यं पश्यन्ति सूरयः ॥' इति । तथा 'कैषा भगवती देवी शङ्करार्धशरीरिणी । शिवा सती हैमवती यथावद्ब्रूहि पृच्छताम् ॥ तेषांतद्वचनं श्रुत्वा ऋषीणां पुरुषोत्तमः । प्रत्युवाच महायोगी ध्यात्वा स्वं परमं पदम् ॥' इति विष्णोः परमपदत्वेन, तदनन्तरम् 'या-सा

Public domain. Digitization Muthulakshmi Research Acade

माहेश्वरी शक्तिर्ज्ञानरूपातिलालसा । व्योमसंज्ञा पराकाष्ठा सेयं हैमवती तथा ॥' इत्यादिना हैमवतीस्वरूपतत्प्रभाववर्णनपरे श्रीकूर्मवचनसंदर्भे, 'एकं सर्वगतं सूक्ष्मं कूटस्थमचलं ध्रुवम् । योगिनस्तत्तुपश्यन्ति महादेव्याः परं पदम् ॥' इति गौर्याः परमपदत्वेन च एकैवशक्तिरुक्ता । तथामङ्कणकं प्रति शिवेन विश्वरूपप्रदर्शने कृते, 'किमेतत्भगवन्रूपं सुघोरं विश्वतोमुख । का च सा भगवत्पार्श्वे राजमाना व्यवस्थिता ॥' इति मङ्कणकपृष्टेन शिवेन स्वस्वरूपप्रभावकथनानन्तरम्, 'मम सा परमा माया प्रकृतिस्त्रिगुणात्मिका । प्रोच्यते मुनिभिश्शक्तिः जगद्योनिस्सनातनी ॥ स एव मायया विश्वं व्यामोहयति विश्ववित् । नारायणः परोऽव्यक्तात् मायारूप इति श्रुतिः ॥' इति मत्साकाशादृष्टा ममशक्तिरिति सैवनारायणरूपेणापि जगन्मोहयतीत्युक्त्वा 'जगदेतदनाद्यन्तं ब्रह्मण्येव व्यवस्थितम् । तदात्मकं तदव्यक्तं तदक्षरमितिश्रुतिः ॥' इति सर्वस्यापि प्रपञ्चस्याव्यक्ताक्षरशब्दितब्रह्माश्रितत्वमभिधाय किम् तत् ब्रह्मेत्याकाङ्क्षायाम्, 'आत्मानन्दं परं तत्त्वं चिन्मात्रं परमं पदं । आकाशं निष्कलं ब्रह्म तस्मादन्यन्नविद्यते ॥' इति यत् परमपदाकाशशब्दाभ्यां प्रसिद्धम् तदिह ब्रह्मोक्तम्, तस्माच्च चेतनाचेतनात्मकसर्वप्रपञ्चकारणादन्यन्नास्तीत्युपसंहृतम् । तत्र 'का च सा भगवत्पार्श्वे' इति प्रश्नस्यैतावदत्र प्रतिवचनम्, सैव नारायणरूपेणावतिष्ठते, सैव

Public domain. Digitization Muthulakshmi Research Acade

परमाकाशपरमपदरूपा परब्रह्मणः पराशक्तिरित्येव तन्महिमप्रख्यापनार्थं इति प्रस्पष्टमेव । अतो गौरीनारायणयोः ब्रह्मधर्मभूत परमाकाश परमपदाख्यचिच्छक्तिरूपभेदात्मकत्वमभिमतमितिज्ञायते । ननु कूर्मपुराणे प्रथमाध्याय एव 'अस्ति द्विजातिप्रवर इन्द्रद्युम्न इति श्रुतः । पूर्वजन्मनि राजासावदृश्यं शङ्करादिभिः ॥ दृष्ट्वा मां कूर्मसंस्थानं श्रुत्वा पौराणिकस्स्वयम् । संहितां मन्मुखाद्दिव्यां पुरस्कृत्य मुनीश्वरान् ॥ ब्रह्माणं च हरं देवं देवानन्यांश्च शक्तिभिः । तद्भक्तान्संस्थितान्वुध्वा मामेवशरणं गतः ॥' इति । 'ममत्वंशा (अस्यास्त्वंशा) नधिष्ठाय शक्तिमन्तोऽभवन्द्विजाः । ब्रह्मेशानादयोदेवास्सर्वशक्तिरियं मम ॥ सैषा सर्वजगत्स्फूर्तिः प्रकृतिस्त्रिगुणात्मिका । प्रागेवमत्तस्संजाता श्रीकल्पेपद्मवासिनी ॥' इति च कूर्मरूपिणा भगवतैव ब्रह्मेशानादिभ्यः स्वयमेव पर इति प्रतिपादितम्, कथमुपक्रान्तपरापरभावव्यत्ययेनोपरि प्रतिपादितमितिचेत् उच्यते । तत्र ब्रह्मणस्संहाररुद्राच्च परत्वं प्रथमाध्याये प्रतिपादितम्, तयोरेव तत्र प्रसादक्रोधप्रभवत्वेन द्वितीयाध्याये प्रतिपादनात् । नतु परमशिवादपि तस्य मूर्तित्रयापेक्षयापि परत्वं शास्त्रान्तरे प्रतिपादितम् । 'तां तां शक्तिं समास्थाय स्वयंदेवो महेश्वरः । करोति देवान्विविधान्ग्रसते चैव लीलया ॥ इज्यते सर्व यज्ञेषु ब्राह्मणैः वेदपारगैः । सर्व कामप्रदो रुद्र इत्येषा वैदिकी श्रुतिः ॥ सर्वासामेव शक्तीनां

Public domain. Digitization Muthulakshmi Research Acade

ब्रह्मविष्णुशिवात्मिकाः । प्रधानास्संस्मृतादेवाः शक्तयः परमात्मनः ॥ आभ्यः परस्ताद्भगवान्परमात्मा सनातनः । गीयते सर्वशक्त्यात्मा शूलपाणिर्महेश्वरः । एनमेके वदन्त्यग्निं नारायणमथापरे । इन्द्रमेके परे प्राणं ब्रह्माणमितरे जगुः ॥ ब्रह्मविष्ण्वग्निवरुणास्सर्वे देवास्तथर्षयः । एकस्यैवाथ रुद्रस्य भेदास्ते परिकीर्तिताः ॥ यं यं भेदं समाश्रित्य यजन्ते परमेश्वरम् । तत्तद्रूपंसमास्थाय प्रददाति फलं शिवः ॥' इति च श्रीकूर्मेण यमिन्द्रद्युम्नं प्रति ब्रह्मेशानादिरूपस्स्वप्रभावो वर्णितः । स एव मुमुक्षुस्तेन शिवमहिमवर्णनपूर्वकशिवज्ञानप्रदानेन शिवपदप्राप्तिरूपं मोक्षं प्राप्तः, इति, प्रथमाध्याय एव वर्णितम्, अतोपि ज्ञायते तुरीयश्शिव इति, तदिदमग्रेस्फुटीकरिष्यामः । न च विष्णोः ब्रह्मसंहाररुद्रयोश्च नियतः परभावोऽभिमतः किन्तु वरगोष्ठीन्यायेन लीलया कालविशेषेषु व्यवस्थितः । अतएव द्वितीयाध्याये 'तिस्रस्तु मूर्तयः प्रोक्ताः ब्रह्मविष्णुशिवात्मिकाः । रजस्सत्वतमोयोगात्परस्य परमात्मनः ॥ अन्योन्यमनुरक्तास्ते अन्योन्यमुपजीवकाः । अन्योन्यप्रणताश्चैव लीलया परमेश्वरः ॥' इति । तस्माद्युक्तमुपरितनं सर्वं गौरीनारायणयोः शिवस्य च धर्मधर्मिभावस्य तत्कृतगुणप्रधानभावस्य च ख्यापनमिति सर्वमनवद्यम् । एवं गौरीनारायणयोश्शिवस्यच सत्यपि तत्तदुपासकफलविशेषप्रधानाद्यनुगुणे काल्पनिके गुणप्रधानभावे, वस्तुतस्तयोः

Public domain. Digitization Muthulakshmi Research Acade

ब्रह्मकोटित्वमपि तत्रैवाविष्कृतम् 'अस्यास्सर्वमिदं जातं तत्रैव लयमेष्यति। एषैव सर्वभूतानां गतीनामुत्तमा गतिः॥ एषधाता विधाता च कारणं कार्यमेवच। कर्ता कारयिता विष्णुर्भुक्तिमुक्तिफलप्रदः॥ भोक्ता पुमानप्रमेयः संहर्त्ता कालरूपधृत्। स्रष्टा पाता वासुदेवो विश्वात्मा विश्वतोमुखः॥' इत्यादिवचनसन्दर्भैः, एवं तावत् कूर्मराजवचनानि शिवगौरीनारायणाभेदे प्रमाणीकृतानि। तथा सनत्कुमारवचनानि च प्रमाणीक्रियन्ते, स्कांदे सनत्कुमारसंहितायां कांचीमहिमवर्णनं प्रस्तुत्य 'यत्र देवी भगवती शङ्कराराधनेरता। अद्यापि लोकरक्षार्थं दृश्यते नाकृतात्मभिः। भिक्षमाणं महादेवं ज्ञात्वा यत्र स्वयं शिवा। शिवानन्दमनाद्यन्तं स्वात्मानं प्रददौ शिवा॥' इति तस्यां कामाक्ष्याः सदा सन्निधिमुक्त्वा, 'तत्पुरीशः पुरा व्यास राजासीद्धनदोपमः। काशीराजो यथा काश्यां काञ्च्यां काञ्चीश्वरस्तथा॥ राजा प्रभाकरो नाम प्रभयार्कसमप्रभः। वैष्णवस्सर्वधर्मज्ञः केशवार्चनतत्परः॥ काशीराजस्य तनया दिवोदासस्य सुव्रता। पद्मिनी नाम तस्यासीत्भार्या तस्य पतिव्रता॥ देव्याराधनतत्वज्ञा तत्परा तत्परायणा। तैस्तैर्भावैः प्रियतमैरर्चयन्तीमहेश्वरीम्॥ पतिव्रतासु नारीषु तत्प्रिया तत्पतीनपि। तेभ्यो मनोरथान्दत्वा प्रीणयामास तैश्च सा॥ प्रीयतां पार्वती देवी विद्यादेहाऽतिनिर्मला। या जगद्रक्षणरता दीनानाथादिपोषिका॥' इत्यादिना

Public domain. Digitization Muthulakshmi Research Acade

काञ्चीपुराधिपं विष्णुभक्तं राजानमम्बिकाभक्तां तस्य महिषीं तयोरिष्टदेवताराधनार्थं च वर्णयित्वा, 'एवं देव्यात्मना स्वेन-रूपेण च जनार्दनः । दम्पत्योरेककार्यत्वात् एक एव द्विधार्चितः ॥' इति, दम्पतिभ्यामाराधितयोः गौरीनारा-यणयोरैक्यं स्फुटमुक्तम् । अनन्तरं च 'एष नारायणो देवः पुराणपुरुषोत्तमः । प्रभाकरस्य पद्मिन्या भक्त्या तुष्टो जनार्दनः ॥' इत्युभयोरपि भक्त्या नारायणस्यैव तुष्टत्वो-क्त्या, 'प्रसन्नस्सर्वभावेन तद्भक्त्या वाङ्मनोतिगम् । पूजान्ते दर्शयामास स्वात्मानं देवमूर्ध्वगम् ॥ श्रीभूमिसहितं सा-क्षात्गरुडस्कंधमास्थितम् ।' इति नारायणात्मनैव वरदानाय सन्निधानोक्त्या च, 'वासुदेवप्रसादेन क्षीणनिःशेषपा-तकौ । प्रीतौ परमयाभक्त्या स्तोतुं तमपि न क्षमौ ॥' इत्यादिना तयोर्नारायणप्रसादेनैव पापक्षयादिसकलफल-लाभोक्त्या च प्रागुक्तं गौरीनारायणयोरैक्यं दृढीकृतम् । गौर्याश्च निरतिशयानन्दरूपशिवधर्मत्वं, 'शिवानन्दमनाद्यन्तं स्वत्मानं प्रददौ शिवा' इति प्रागुक्तं प्रतिपादितं । तेन नारायणस्यापि तथात्वमर्थात्सिद्धम् । तस्य च धार्मिरूप-शिवाभेदः, 'त्वद्विधानां च सर्वेषां मद्भक्तानां नृपोत्तम । मुक्तिः करतलस्थैव पुनर्जन्मविरोधिनी ॥ मत्प्रसादान्न सन्देहः किमुताग्रे स्थिते मयि ।' इति तद्वचनाकर्णनात्तद्दर्शनमा-त्रेण स्वस्यमुक्तिं भाविनीं निश्चित्य कृतकृत्यतां मन्वानस्य तत्प्रतिज्ञातमुक्तिलाभोपयोगिकाशीवासपाशुपतव्रतचिकीर्षो -

Public domain. Digitization Muthulakshmi Research Acade

त्पादनार्थं 'अशेषोपनिषद्वेद्यं न यस्मात्परमं पदम् । अविमुक्तमिति प्रोक्तं साक्षाद्विष्णोः परं पदम् ॥ तस्मिन्पाशान्पशूञ्छित्वा शोषयित्वा विदाह्य तान् । प्लावनादमृतीकाराच्छिवत्वस्य प्रभावनात् ॥ त्यक्त्वा पशुत्वं मां प्राप्य न कश्चिज्जायते पुमान् ।' इति प्रभाकरं प्रति तद्वचनेन पाशुपतानुष्ठानलभ्यशिवप्राप्तेः 'मां प्राप्येति' स्वप्राप्तित्वोक्त्या स्फुटीकृतः । तदनन्तरं च "वेदान्तैरखिलैर्वेद्यः यः त्वमेव जनार्दन । सः प्राप्तोऽद्यमया देव किं ते तत्परमं पदम् ॥' इति पृष्टवन्तं प्रभाकरं प्रति 'अपरञ्च पदं राजन्परमञ्च पदं मम । भोगैश्वर्यप्रसक्तानामपरं प्रोच्यते पदम् ॥ विरक्तानां विमुक्तानामात्यन्तिकलयार्थिनाम् । भस्मज्योतिर्दिदृक्षूणां शिवं तं सोममीश्वरम् ॥ अपरावर्तिनां साक्षात्परमं पदमिष्यते । वर्णाश्रमाचारयुतः कृत्वा पाशुपतव्रतम् ॥ योगं पाशुपतं युञ्जन्पदमस्यैति तत्परम् ।' इत्युक्त्वा ततः 'किंतद्व्रतं कथं कार्यं पाशानां छेदनं कथम् । शोषणं दहनं प्लावममृतीकरणं तथा । को वा पाशुपतो योगः कथञ्च शिवभावना ॥ का मुक्तिः किञ्च विज्ञानं प्राप्यं यस्मान्न विद्यते । कः शिवः कः शिवानन्दः प्रसीद परमेश्वर ॥' इति पृष्टवन्तंप्रति त्वत्पृष्टार्थपरिज्ञानाय ब्रह्मादयः काश्यां मां उद्दिश्य तपस्यन्ति, त्वमपि तत्र गत्वा तपः कुरु, दशसंवत्सरान्ते सन्निधाय तेभ्यस्तुभ्यं चोपदेक्ष्यामीति काश्यां तपसि तं नियुज्य, तथैव तस्मिन्काले सन्निधाय ब्रह्मादिभ्यः प्रभाकरसहितेभ्यः

Public domain. Digitization Muthulakshmi Research Acade

पाशुपतादिव्रतस्वरूपोपदेशानन्तरं प्रभाकरंप्रति द्वादशवार्षिकपाशुपतव्रतमनुष्ठायाऽश्वमेधं कृत्वा तत्समापनानन्तरं विश्वेश्वरं दृष्ट्वा दक्षिणामूर्तिसन्निधिमागच्छेत्युपदिश्य, 'तत्र द्रक्ष्यसि मां देवं विश्वात्मानं पिनाकिनम् । सुयशानन्दिसहितं वृषराजे समास्थितम् ॥' इत्युक्त्या च स्फुटीकृतः, नारायणस्य शिवाभेदेनैव तदभिन्नायाः गौर्याः शिवाभेदोप्यर्थसिद्धः ॥

ननु हरिवंशे पारिजातसंहितायां पारिजातप्रार्थनार्थं भगवता निसृष्टार्थदूततया इन्द्रंप्रति प्रेषितेन नारदेन नानाविधैरुपायैः प्रार्थित इन्द्रो यदा पारिजातं प्रदातुं नैच्छत्तदा तंप्रति रहस्तन्महिमख्यापनार्थानि वचनानि पठ्यन्ते । 'य एको विश्वमध्यास्ते प्रधानं जगतो हरः । प्रकृत्या यं परं सर्वे क्षेत्रज्ञं वै विदुर्बुधाः ॥ तस्याऽव्यक्तस्य यो व्यक्तो भागस्सर्वोद्भवोद्भवः । तस्यात्मा प्रथमो देवो विष्णुस्सर्वत्रयीमयः ॥ प्रकृत्याः प्रथमो भाग उमादेवी यशस्विनी । व्यक्तस्सर्वमयो विष्णुः स्त्रीसंज्ञो लोकभावनः ॥ रुक्मिण्याद्यास्त्रियस्तस्य व्यक्तत्वे प्रथमो गुणः । अव्यक्ता प्रकृतिः देवी गुणी देवो महेश्वरः ॥ गुणिनश्चाव्ययाख्यस्य सदारः प्रथितो गुणः । नारायणो महातेजास्सर्वकृल्लोकभावनः ॥ भोक्ता महेश्वरो देवः कर्ता विष्णुरधोक्षजः । ब्रह्मादेवगणाश्चान्ये पश्चात्सृष्टामहात्मना ॥ महादेवेन देवेशाः प्रजापतिगणास्तथा । एवं पुराणपुरुषो विष्णुर्वेदेषु पठ्यते ॥

Public domain. Digitization Muthulakshmi Research Acade

अचिन्त्यश्चाप्रमेयश्च गुणेभ्यश्च परस्तथा ।' इति । अत्र शिवस्यांशो नारायणः, प्रकृतेरंशो गौरीति, गौरीशिवयो-र्गौरीनारायणयोश्च भेदः प्रतिपाद्यः । नारायणस्य परम-शिवाभेदः प्रतिपाद्य इति कथं प्रतीयते – उच्यते, एतान्यपि वचनानि कूर्मराजसनत्कुमारवचनानुरोधेन नेतव्यानि । तन्नयनप्रकार च इत्थम् । 'तस्याऽव्यक्तस्य' इत्यत्र अव्यक्त-शब्देन प्रकृतिरूपा चिच्छक्तिरुच्यते । अव्यक्ता प्रकृतिर्देवी-त्यग्रे विवरणात्, इह पुल्लिंगनिर्देशः तस्येति हरपरामर्शि-पदसामानाधिकरण्यात्, तत्सामानाधिकरण्यनिर्देशस्तु चिच्छक्तेः धर्म्यऽभेदस्फोरणार्थः । तथा च तस्य हरस्या-ऽव्यक्तसच्छिच्छक्त्यवस्थापन्नस्य यो व्यक्तोभागः स की-दृशः, सर्वभवोद्भवः सर्वकार्योत्पत्तिहेतुः । अनेन सर्गादौ चिच्छक्तेस्सर्वकार्यवर्गकारणतया व्यक्तो भागः कश्चिदावि-र्भवतीति लभ्यते । तस्य कारणात्मना व्यक्तस्य भागस्य संबन्धी, प्रथम - आत्मा कार्यवर्गस्य अवान्तर कारणभूतान् हिरण्यगर्भादीनपेक्ष्याद्यचेतनः, सहिरण्यगर्भसकलचराचर-प्रपञ्चोपादानभूतो भगवान्विष्णुरिति सर्वस्य धीमतो विवे-किनो मतमिदम् । व्यक्तभागे कस्मिंश्चिद्विभक्ते सत्यव्यक्त-भागो यः तन्मूलतया स्थितः सा भगवती गौरीति, तस्मा-त्सर्वमनवद्यम् । एवं शिवस्य धर्मिरूपत्वं, गौरी-नारा-यणायोः तद्धर्माऽव्यक्तभागरूपत्वं, अतएव त्रयाणां ब्रह्मको-टित्वं च समर्थितम् ।

Public domain. Digitization Muthulakshmi Research Academy

तथा नारायणस्य महिमानं, शिवप्राप्तिमिच्छतां तत्समाश्रयणावश्यंभावं च दर्शयति ।

तस्यैवाद्यस्य पुंसः परिणतिरखिलोप्यंबरादिर्विकारः
तस्यैवांशो विरिञ्चावधिरिह सकलोप्येषसंसारिवर्गः ।
प्राप्यं कृत्वैव तस्य प्रपदनममृतस्याद्यमानन्दमूर्ति-
स्थानं भर्गस्य जुष्टं तदमृततनयैर्देवदेवैर्पुराणैः ॥

हरेरेकस्यैव परिणामः वियदादिः सर्वोविकारः । 'यच्च किंचित् जगत्यस्मिन्' इत्यादि मन्त्रवर्णात् । नच निरवयवस्य परिणामानुपपत्तिः, यतः तस्मिन्नेव मन्त्रे 'प्रज्ञा च तस्मात्प्रसृता पुराणी' इति, धर्मज्ञानस्य प्रसरणोक्त्या परिणामित्वविभावनात्, ब्रह्ममीमांसायां 'कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा' इति सूत्रेण कृत्स्नैकदेशविकल्पकल्पनया ब्रह्मणो विश्वाकारपरिणामानुपपत्तिमाशंक्य 'श्रुतेस्तु शद्बमूलत्वात्' इति सूत्रेण श्रुतिप्रतिपन्नेऽर्थे नैवंभूततर्कावकाश इति समाहितत्वाच्च । हरिवंशे कैलासयात्रायां 'यत्तत्कारणमाहुस्तत् सांख्याः प्रकृति संज्ञकम् । ततो महान्समुत्पन्नः प्रकृतिर्यस्य कारणम् ॥ त्रिधा भूतं जगद्योनिं प्रधानं कारणात्मकं । सत्वं रजः तमो विष्णो जगदण्डं जनार्दन ॥ तस्य कारणमाहुः त्वां सांख्याः प्रकृतिसंज्ञकम् ।

Public domain. Digitization Muthulakshmi Research Acade

तद्रूपेण भवान्विष्णो परिणम्याधितिष्ठति ॥' इति कृष्णंप्रति शिववचनेन तस्य परिणामिकारणत्वस्फुटीकरणाच्च । प्रकृतेः जन्मकारणं भवान्प्रकृतिरूपेण परिणम्य महदादि-कार्यजातमधितिष्ठति व्याप्नोतीत्यर्थः । तथा सर्वःसांसा-रिको नारायणस्यैवांशः, 'ममैवांशो जीवलोके' इत्यादि स्वारस्यात् । तदाश्रयणं कृत्वैव शिवस्य दिव्यस्थानं प्राप्तव्यम् । 'त्वामनाश्रित्य विश्वात्मन् न योगी मामुपेष्यति । पालयैतत्जगत्कृत्स्नं सदेवासुरमानुषम् ॥' इति कौर्मे नारायणं प्रति शिववचनात् । तदेव शिवस्य दिव्यस्थानं आनन्द-मूर्त्यादिना विशेषितम् । तद्धि प्रकृति-माया-महामाया-विकार-मलिन-मिश्र-शुद्ध-प्रपंचातीतं परमशिवानादिचिच्छक्तिरूप परमानन्दमयं शिवपुराणादिप्रसिद्धं, 'अमृतस्य एतानि हवा अमृतस्य नामधेयानि' इत्यत्रामृतशब्दितस्य शिवस्य तनयैर्देवानामपि देवैः पुराणैर्जुष्टं च । 'अमृत तनयैः' इत्य-नेन, युजे वां ब्रह्म पूर्व्यं नमोभिर्विश्लोकायन्ति पथ्येव सूरेः श्रृण्वन्ति विश्वे अमृतस्य पुत्रा आ ये धामानि दिव्यानि तस्थुः', इति श्वेताश्वतरोपनिषन्मन्त्रप्रतिपन्नः तेषां महिमा स्मारितः । अस्य मन्त्रस्य अयमर्थः, वां युवयोः शिव-शक्त्योर्मध्ये पूर्व्यं — स्वार्थे यत् प्रत्ययः, विशेष्यतया प्रधानभूतं ब्रह्म शिवस्वरूपं, नमोभिः युजे युनज्मि छान्दसो विकरणव्यत्ययः । शिवस्य सर्वनमस्कारपर्यवसानभूमित्वात् तन्नमस्काराङ्कितैश्लोकैर्भजामि इत्यर्थः । नमस्कारश्लोका

Public domain. Digitization Muthulakshmi Research Acade

विशेष्यन्ते, सूरेः विदुषः शिवरूपाभिज्ञस्य, तज्ज्ञानान्मुक्तिं प्राप्तस्य मम, श्लोकाः, वाचिकशिवनमस्कारसन्दर्भरूपाः 'अहँ श्लोककृत्' इति मुक्तकृत्यत्वेन श्रुतिप्रसिद्धाः, पथ्येव पथिहिताः त्वरितनिर्विकारगमनाः सदश्वा इव वियन्ति निरर्गलप्रवाहतया गच्छन्ति, पथ्य शब्दात् 'सुपां सुलुक्' इत्यादि सूत्रेण जस आकारः, विश्वेपि अमृतस्य शिवस्य पुत्रा नन्दिकेश्वरादायः पार्षदाः शृण्वन्ति, अमृतपुत्रा विशेष्यन्ते, ये दिव्यानि दिवि भवानि चिदाकाररूपे नित्यकैलासे स्थितानि धामानि भवनान्यातस्थुरिति । देवदेवैरित्यनेन देवव्रताद्यसामप्रतिपन्नः तेषां महिमा स्मारितः । तत्र हि पृथिवीषदोन्तरिक्षसदो दिविषदोप्सुषदो दिक्षुसद आशासदश्चेत्येवं जगद्व्यापिनः ते प्रतिपर्यायं द्विवारमावर्तितैः देवदेवशब्दैः सदारसकलदेवनियन्तृत्वेनप्रतिपादिताः । तथा शिवपुराणेप्युपब्राह्मितम्, 'ते हि साक्षाद्दिविषदोन्तारिक्षसदस्तथा । पृथिवीषद इत्येते देवा देवव्रतैस्तु ताः ।' इति, पुराणैरित्यनेन 'दिव्या गणा बहुरूपाः पुराणाः' इत्यायुष्यसूक्तमन्त्रप्रतिपन्नस्तेषां महिमास्मारितः । तेषां एतावन्महिमजातं सौप्तिके पर्वणि भगवता व्यासेन संगृहीतम् । 'कामकारकरास्सिद्धाः त्रैलोक्यस्येश्वरेश्वराः । नित्यानन्दाः प्रमुदिता वागीशा वीतमत्सराः ॥ प्राप्याष्टगुणमैश्वर्यं ये न यान्ति च विस्मयम् । येषां विस्मयते नित्यं कर्मभिः भगवान्भवः ॥ मनोवाक्कायनिरतान्पातिपुत्रानिवौरसान् । श्रुतेन ब्रह्मचर्येण तपसा च

Public domain. Digitization Muthulakshmi Research Acade

दमेन च ॥ ये समाराध्य शूलाङ्कं तत्सायुज्यं समागताः ।’ इति, अत्र ‘त्रैलोक्यस्येश्वरेश्वराः’ इत्यनेन देवदेवत्वं संगृहीतम् । ‘पातिपुत्रानिवौरसान्’ इत्यनेन अमृतपुत्रत्वं संगृहीतम् । ‘वागीशाः’ इत्यनेन श्लोककृत्वं श्लोकश्रोतृत्वं च संगृहीतम् । ‘दिव्या गणा बहुरूपाः पुराणाः’ इति मन्त्रोक्त बहुरूपत्वं तु प्रागेव तेषां बहुविधघोरशान्तरूपोक्त्या संगृहीतं ॥

अथ गौरीमहिमप्रदर्शनपूर्वकं तस्याः शिवसहोपासनानियमं दर्शयति ।

ख्याताः कोट्यो नवाष्टादश नपरिमितास्थाणुवैरुष्ठवेधः
शक्तीनां यत्कलांशाः त्रिभुवनविषयाश्शंकरस्यैव भोग्याः ।
या विख्याता कृपाब्धिश्श्रुतिशिरसिपरब्रह्मविद्याप्रदात्री
साहित्यं सा भवानी भजति नियमतश्शंकरोपासनासु ॥

अत्र सर्वशक्तीनामुमांशत्वेन शंकरभोग्यत्वे वाराहपुराणवचनानि । नवकोट्यस्तु चामुण्डा भेदा भिन्ना व्यवस्थिताः । या रौद्री तामसी शक्तिः सा चामुण्डी प्रकीर्तिता ॥ अष्टादश तथा कोट्यो वैष्णव्या भेद उच्यते । या सा तु राजसी शक्तिः पालनी सैव वैष्णवी ॥ या ब्रह्मशक्तिस्सत्वस्था सानन्ता वै प्रकीर्तिता ॥ एतेषु सर्वदेवेषु

Public domain. Digitization Muthulakshmi Research Acade

पृथगेकैकशो धरे । सर्वासां भगवान्रुद्रस्सर्वगत्वात्पतिर्भवेत् ॥ यावत्यस्स्युः महाशक्त्यः तावद्रूपाणि शंकरः । कृतवान्ताः तु भजते पतिरूपेण सर्वदा ॥' इति । उमायाः परमविद्याप्रदातृत्वं 'तस्मिन्नाकाशे स्त्रियमाजगाम उमां हैमवतीं बहुशोभमानाम्' इत्यादि, तलवकारोपनिषद्वाक्ये, 'ते ध्यानयोगानुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्निगूढाम्' इत्यादि श्वेताश्वतरोपनिषन्मन्त्रे च प्रसिद्धम् । शिवोपासनायां तस्यास्सहोपासना नियमः, 'तस्मात्सह तया शक्त्या हृदि पश्यन्ति ये शिवम् । तेषां शाश्वतिकी सिद्धिर्नेतरेषामिति श्रुतिः ।' इति शिवपुराणे प्रतिपादितः ।

शिवोपासनायाः साक्षान्मुक्तिहेतुत्वमाह ।

श्रीमत्कूर्मेण याऽत्याश्रमरतविषया भावनोक्ता तृतीया
दिव्यस्थानप्रदात्री सगुणविषयिणी शङ्करालम्बना सा ।
ये त्वन्ये भावने ते सरसिजनयनेनादिशक्त्या च युक्ते
प्रापिण्यौ ते तु तस्याः क्रमिकफलयुते भौतिकं सांख्यमाप्ते ॥

श्रीकूर्मपुराणे इन्द्रद्युम्नं प्रति श्रीकूर्मवचनादीनि, 'त्रिविधा भावना ब्रह्मन्प्रोच्यमाना निबोध मे । एका मद्विषया तत्र द्वितीयाऽव्यक्त संश्रया ॥ अन्या तु सगुणा ब्राह्मी

Public domain. Digitization Muthulakshmi Research Acade

विज्ञेया त्रिगुणातिगा । आसामन्यतमां वाथ भावनां भावयेत्बुधः ॥ असक्तस्संश्रयेदाद्यां इत्येषा वैदिकी श्रुतिः ।' इति 'तस्मात्सर्वप्रयत्नेन तन्निष्ठस्तत्परायणः । तमाराधय विश्वेशं ततो मोक्षमवाप्स्यसि॰ ॥' इति, भावनां अत्याश्रम्याद्यधिकारित्वं श्रीकूर्मेण द्वितीयाध्याये देवर्षिं प्रत्युक्तम् । 'योगी च त्रिविधोज्ञेयो भौतिकस्सांख्य एव च । तृतीयोऽत्याश्रमी प्रोक्तो योगमुत्तममाश्रितः ॥ प्रथमा भावना पूर्वे सांख्येत्वऽक्षरभावना । द्वितीया चान्तिमा प्रोक्ता भावना पारमेश्वरी ॥' इति, अत्याश्रमिणोमुक्त्यर्थं पाशुपतव्रतानुष्ठानपूर्वकं भस्मोद्धूलन-त्रिपुण्ड्रुद्राक्षधारण-पञ्चाक्षरजपादिनिष्ठाः,एतत् कूर्मपुराण एव सुशीलं नामानं राजानं मोक्षार्थं यतमानं प्रस्तुत्योक्तम् । 'यथास्मिन्नंतरेपश्यन्समायान्तं महामुनिम् । श्वेताश्वतरनामानं महापाशुपतोत्तमम् ॥ स भस्मदिग्धसर्वाङ्गं कौपीनाच्छादनान्वितम् । तपसा कर्शितात्मानं शुक्लयज्ञोपवीतिनम् ॥ समाप्यसंस्तवं शंभोरानन्दास्राविलेक्षणम् । ववन्दे शिरसा पादौ प्राञ्जलिर्वाक्यमब्रवीत् ॥ धन्योस्म्यनुगृहीतोस्मि यन्मे साक्षान्महेश्वरः । योगीश्वराद्य दृष्टोयं योगी योगविदां वरः ॥ अहो मे सुमहद्भाग्यं तपांसि फलितानि मे । किं करिष्यामि शिष्योऽहं भक्तं मां पालयानघ ॥ सोनुगृह्याथ राजानं सुशीलं धर्मसंहितम् । शिष्यत्वे परिजग्राह तपसा क्षीणकल्मषम् ॥ सान्यासिकं विधिं कृत्स्नं कारयित्वा विचक्षणः । ददौ तदैश्वरं ज्ञानं

Public domain. Digitization Muthulakshmi Research Acade

स्वशाखोक्तं हितप्रदम् ॥ अशेषवेदसारं तत्पशुपाशविमोचनं । अत्याश्रममिति ख्यातं ब्रह्मादिभिरनुष्ठितम् ॥ उवाच तमभिप्रेक्ष्य एतदाश्रमवासिनः । ब्राह्मणान्क्षत्रियान्वैश्यान्ब्रह्मचर्यपरायणान् ॥ मया प्रदर्शितां शाखामधीत्यैवेह योगिनः । समासते महादेवं ध्यायन्तो निष्कलं शिवम् ॥ आदिदेवो महादेवो रममाणस्सहोमया । अध्यास्ते भगवानीशो भक्तानामनुकम्पया ॥ इहाशेषजगद्धाता पुरा नारायणस्स्वयम् । आराधयन्महादेवं लोकानां हितकाम्यया ॥' इत्यादि । श्वेताश्वतराणां मन्त्रोपनिषदि पशु-पाश-पतिनिरूपणं मुक्त्यर्थं योगनिरूपणं च 'मया प्रदर्शितां शाखाम्' इत्यनेनोक्तम् । तत्रह्याम्नायते, 'तपः प्रभावाद्देव प्रसादाच्च ब्रह्मवित् श्वेताश्वतरोऽथ विद्वान् । अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सत्यं ऋषि सङ्घजुष्टम्' इति । 'सांख्येत्वऽक्षरभावना' इति, 'द्वितीयाऽव्यक्तसश्रया' इति च, अक्षर, अव्यक्त, शब्दाभ्यां परब्रह्मणः शिवस्य चिच्छक्तिरुक्ता । 'जगदेतदानाद्यन्तं ब्रह्मण्येव व्यवस्थितम् । तदात्मकं तदऽव्यक्तं तदक्षरमिति श्रुतिः' इति कौर्मे एव तस्यां अव्यक्ताऽक्षरव्यवहारादर्शनात्, इयमेव च द्वितीया भावना, तृतीया सगुणा भावना साक्षात्परमेश्वरविषया दिव्यस्थानप्रदा परममुक्त्युपाय भूता च, आद्ये तु भावने तद्द्वारे । अत एव चिरं नारायणमेवोपासितवतः इन्द्रद्युम्नस्य द्वितीयभावनाप्रवृत्तिपूर्वकं तृतीयभावनया निरस्तनिखिलद्वैतजीवाभिन्ननिर्गुणब्रह्मज्ञान-

Public domain. Digitization Muthulakshmi Research Acade

साधनोत्तमयोगप्राप्तिः तस्य परमेश्वरदिव्यस्थानप्राप्तिश्चोक्ता। 'संप्राप्य भावनामन्त्यां ब्राह्मीमक्षरपूर्विकाम् । अवाप परमं योगं येनैकं परिपश्यति ॥ यं विनिद्रा जितश्वासाः कांक्षन्ते मोक्षकांक्षिणः ॥' इति, 'आनन्दमचलं ब्रह्म स्थानं तत्पारमेश्वरम् । सर्वभूतात्मभूतस्थः परमैश्वर्यमास्थितः ॥ प्राप्तवानात्मनो धाम यत्तन्मोक्षाख्यमव्ययम् । तस्मात्सर्वप्रयत्नेन वर्णाश्रमविधौ स्थितः ॥ समाश्रित्यान्तिमं भावं मायालक्ष्यं तरेत् ध्रुवम् ।' इति च, प्राप्यस्थानेषु तदपेक्षयोत्तमं नास्तीति च तत्रैव द्वितीयाध्याये दर्शितम् । 'प्राजापत्यं ब्राह्मणानां स्मृतं स्थानं क्रियावताम् ॥ स्थानमैन्द्रं क्षत्रियाणां सङ्ग्रामेष्वपलायिनाम् । वैश्यानां मारुतं स्थानं स्वधर्ममनुवर्त्तिनाम् । अष्टाशीतिसहस्राणां ऋषीणामूर्ध्वरेतसाम् ॥ हैरण्यगर्भं तु स्थानं यस्मान्नावर्त्तते पुनः ॥ योगिनां चामृतं स्थानं व्योमाख्यं परमं पदम् । आनन्दमैश्वरं धाम सा काष्ठा सा परागतिः ।' इति । एवं परमाकाशरूप पारमेश्वरदिव्यस्थानप्रापिण्यास्तृतीयभावनायाः निर्गुणयोगसंपादनद्वारा परमुक्तिहेतुत्वं पुराणावसानेपि स्फुटीकृतम् । 'मया प्रोक्ता हि भवतां योगः प्रागेव निर्गुणः । आरुरुक्षुस्तु सगुणं पूजयेत्परमेश्वरम् ॥ पिनाकिनं त्रिनयनं जटिलं कृत्तिवाससम् । पद्मासनस्थं रुक्माभं चिन्तयेद्वैदिकैः श्रितम् ॥ एषयोगस्समुद्दिष्टस्सबीजो मुनिपुंगवाः ।' इत्यारभ्य 'यथाविधि प्रकुर्वाणः प्राप्नुयादैश्वरं पदम्' इत्यन्तेन, अत्र

Public domain. Digitization Muthulakshmi Research Academy

तृतीयभावनाविवक्षितेत्येतदन्यभावनाद्वयविषयवचनेन स्फुटीकृतं, अनन्तरमेव च 'अन्ये च भावने शुद्धे प्रागुक्ते भवतामिह । अत्रापि कथितो योगो निर्बीजश्च सबीजकः । ज्ञानं तदुक्तं निर्बीजं पूर्वं हि भवता मम ॥' इत्याद्यभावनयोरपि सगुणनिर्गुणविषयत्वेनद्वैविध्यमुक्तम्, सगुणयोः तयोः, 'रुद्रं विष्णुं विरिञ्चं वा सबीजं भावयेत् बुधः । अथवाग्न्यादिकान्देवान् तत्परः संयतेन्द्रियः ॥' इति कांश्चन विषयानापाततः प्रदर्श्य, 'पूजयेत्पुरुषं विष्णुं चतुर्मूर्तिं परं हरिम् । अनादिनिधनं देवं वासुदेवं सनातनम् ॥ नारायणं जगद्योनिमाकाशं परमं पदम् । तल्लिङ्गधारी नियतः तद्भक्तस्तत्परायणः ॥ एष एव विधिर्ब्राह्मो भावनेचेति मे मतिः ।' इति । अत्र बाह्यपूजाया इव आद्यभावनाद्वयस्यापि विषयोक्त्या, 'पूजयेत्पुरुषं विष्णुं' इत्यादौ चतुर्भुजत्वादिविशिष्ट विष्णुरूपं तन्मूलपरमाकाशरूपं च विवक्षितमित्यवसीयते । तदनुसारेण 'आकाशं परमं पदं' इत्येतत् द्वितीयभावनाविषय समर्पकत्वेन प्रत्येकं योजनीयं । 'तल्लिङ्गधारी' इत्यत्र तल्लिङ्गम् द्वितीयाध्याये दर्शितं । 'आश्रमो वैष्णवो ब्राह्मो हराश्रम इति त्रयः । तल्लिङ्गधारी नियतस्तत्भक्तजनवत्सलः ॥ ध्यायेत्तथाचयेंदेतान्ब्रह्मविद्यापारायणः । सर्वेषामेव लिंगानां शंभोर्लिङ्गमनुत्तमम् ॥ सितेन भस्मना कार्यं ललाटे तु त्रिपुण्ड्रकम् ॥ यस्तु नारायणं देवं प्रपन्नः परमं पदम् । धारयेत्सर्वदा शूलं ललाटे गन्धवारिभिः ॥ प्रपन्ना ये जगद्बीजं ब्रह्माणं

Public domain. Digitization Muthulakshmi Research Acade

परमेश्वरम् । तेषां ललाटे तिलकं धारणीयं तु सर्वदा ॥' इति, आदिशक्त्युपासनायाः नारायणोपासनाया इव विग्रहविषयत्वतल्लोकप्राप्तिद्वारकत्वापेक्षायां पारिशेष्याच्छिवधर्मोत्तरादिप्रसिद्धमुमाविग्रहविषयत्वं तल्लोकप्राप्तिपरत्वं च ग्राह्यं। तदुपासनायां तल्लिङ्गं त्रिपुण्ड्रमेव भवतीत्यास्तां विस्तरः ।

एवं मुक्त्युपायत्वेन वर्णितायाः तृतीयभावनाया अहंग्रहोपासनारूपत्वं साक्षात्कारद्वारकत्वं तत्प्राप्यस्य शिवलोकस्य विष्णुलोकादप्यूर्ध्वलोकत्वं च दर्शयति ॥

विद्वांसः शंकरस्य श्रुतिमतिमहितोपासनावासनाभिः
लब्धस्वान्तप्रतिष्ठास्सुदृढमभिदया तं विलोक्यात्मनैव ।
गोलोकस्योर्ध्वभागादपि परमपदाद्वैष्णवस्योर्ध्वदेशे
भास्वत्कोटिप्रभं यान्त्यपुनरपगमस्थानमानन्दरूपम् ॥८॥

श्रवणमननयोः विध्यनंगीकारादनियमाशंकायां लौकिकप्रमाणेनैव तयोर्नियमतः प्राप्तिमभिप्रेत्य 'श्रुतिमतिमहितः' इति विशेषितम् । श्रवणमननोपासनानां अभेदविषयत्वात् तद्वासनादार्ढ्येन तत्फलस्य साक्षात्कारस्याप्यभेदविषयत्वमभिप्रेत्य 'वासनाभिः' इत्युक्तम् । उपासनायास्साक्षात्कारद्वारत्वाभेदविषयत्वयोरिन्द्रद्युम्नं प्रति कूर्मवचनम् । 'सर्वसङ्गान्परित्यज्य

Public domain. Digitization Muthulakshmi Research Acade

ज्ञात्वा मायामयं जगत् । अद्वैतं भावयात्मानं द्रक्ष्यसे परमेश्वरम् ॥' इति । गोलोकस्योपरिभागो वैष्णवं परमं पदं इत्यत्र श्रुतिः 'ते ते धामान्युश्मसीगमध्ये गावो यत्र भूरिश्रृङ्गा अयासः । अत्राह तदुरुगायस्य विष्णोः परमं पदमवभाति भूरेः ।' इति । अस्यार्थः हे विष्णो ते तानि तच्छब्दाद्बहुवचनस्य 'सुपां सुलुक्' इत्यादिसूत्रेण शे इत्ययमादेशः ते तव धामानि स्थानानि गमध्ये गन्तुं उश्मसी इच्छामः गमध्य इति गमेर्धातोः 'तुमर्थे सेन्' इत्यादि तुमुन्प्रत्ययार्थे अध्ये प्रत्ययः । उस्मसीति वशकान्ताविति धातोरुत्तमपुरुष बहुवचने, 'इदन्तोमसी' इति सूत्रेणान्तिम इकारागम इति सांहितो दीर्घः तान्येव धामानि विशेष्यन्ते यत्र येषु स्थानेषु अयासः अनपायिन्यः यातेरसुन्प्रत्यये नञ् समासः भूरिशृंङ्गा दीर्घश्रृगा गावः नन्दादयः गोमातरः सन्ति, अत्राह एष्वेव स्थानेषु अहेति निपात एवकारार्थः, तत् प्रसिद्धं उरुगायस्य उरुभिः महद्भिः गीयमानस्य भूरेः महतो विष्णोः तव परमं अधस्तनविष्णुलोकापेक्षयोत्कृष्टम् पदमवभाति परमशिवलोकस्याधस्तात्भातीति, न च 'ब्रह्मणस्सदनात्तस्य परं स्थानं प्रकाशते' इति ब्रह्मलोकात्परत्वेन श्रुतस्य विष्णुलोकस्य कथं गोलोकान्तर्गतत्वमिति शंकनीयं गोलोकस्यापि ब्रह्मलोकात्परत्वात्, अतएव आनुशासनिके कथं गोलोकस्य ब्रह्मलोकादपि परत्वं पृष्टवन्तं युधिष्ठिरं प्रति तत्र कारणं ब्रह्मवरदानं भीष्मेणोक्तं 'येऽर्चयन्ति

Public domain. Digitization Muthulakshmi Research Academy

त्वद्भवा गा गोलोकं यान्तु ते नराः । मल्लोकोपरिवत्स्यन्ति भवत्या रोहिणीप्रजाः ॥' इति, 'मल्लोकोपरि ते लोको भविता सुरभे सदा । त्वत्सुताः त्रिजगद्भूत्यै गावो भूम्यां चरन्त्विह ॥' इति, हरिवंशे गोवर्धनोद्धरणेन गास्संरक्षितवंतं कृष्णं प्रति शक्रवचनैरपि ब्रह्मलोकादुपरि गोलोकः तस्योपरिभागे वैष्णवं परमं पदमिति प्रतिपादितम् 'स्वर्गादूर्ध्वं ब्रह्मलोकः महर्षिगणसेवितः । तस्योपरि गवां लोकः साध्यास्तं पालयन्ति हि ॥ त्वं हि सर्वगतः कृष्ण महाकाशगतो महान् । उपर्युपरि तत्रापि गतिस्तव तपोमयी ॥ यन्नविद्मो वयं सर्वे पृच्छन्तोपि पितामहम् । यं योगनिरता विप्रा भजन्ते ब्रह्मवादिनः ॥' इति 'साध्याः' 'यत्र पूर्वे साध्यास्सन्ति देवाः' इति पुरुषसूक्तोक्ताः देवताः, 'उपरि' गवां समीप एव, उपरि भागे । शिवधर्मोत्तरे तु शास्त्रे पञ्चमाध्याये ब्रह्मलोकात्परं विष्णुलोकं प्रकृत्य 'इत्थं विष्णुपदादूर्ध्वं दिव्यं शिवपदं महत् । भोगसंस्थानमतुलं कर्मयोगरतात्मनाम् ॥ अप्रमेय गुणैर्दिव्यैर्विमानैस्सार्वकामिकैः । असंख्यैस्तत्पुरं व्याप्तं सर्वप्राण्युपकारकैः ॥ सहस्रभूमिविस्तीर्णैः कोटिसूर्यप्रकाशनैः । रुद्रलोकमिति प्रोक्तमशेषगुणसंयुतम् ॥ सर्वेषां शिवभक्तानां तत्पुरं परिकीर्तितम् । रुद्रक्षेत्रमृतानां च जङ्गमस्थावरात्मनाम् ॥' इत्यादि वचनैरपि शिवलोकं वर्णयित्वा, 'इत्येतद्परं प्रोक्तं श्रीमच्छिवपुरं महत् । देहिनां कर्मनिष्ठानां पुनरावर्तनं स्मृतम् ॥' इति तत्प्रसंगं

Public domain. Digitization Muthulakshmi Research Academy

समाप्य, 'उर्ध्वं शिवपुरं ज्ञेयं स्थानत्रयमनुत्तमम् । नित्यं परमशुद्धं च स्कन्दोमाशङ्करात्मकम् ॥' इत्युक्त्वा पुनर्द्वादशाध्यये 'विष्णुलोकाच्च परतश्श्रीमच्छिवपुरं महत् । द्वात्रिंशत्कोटिविस्तीर्णं द्विगुणेन समुच्छ्रितम् ॥' इत्यादिना महता प्रपञ्चेनोपरि शिवपुरं वर्णयित्वा तत्र सर्वतोभद्रे मणिमण्डपे शिवस्यावस्थानमुक्त्वा 'ईश्वरायतनस्याग्रे श्रीमान्धर्मवृषस्थितः । यत्र वीरवृषस्तत्र नित्यं गोमातरः स्थिताः ॥ गोलोकश्शिवलोकश्च एक एक ततस्स्थितः । ये गुणारुद्रलोकस्य गोलोकस्यापि ते गुणाः ॥' इत्यपरं परशिवलोकान्तर्गतं गोलोकमभिधय, 'शिवलोकाद्बहिर्ज्ञेयमण्डस्यावरणात्मकम् । अण्डादूर्ध्वं पुनर्ज्ञेयं प्रकृतेर्महतः स्थितम् । ब्रह्मणः परमस्थानं पद्मरागसमप्रभम् ॥ ब्रह्मलोकात्परं ज्ञेयं विष्णुस्थानं सनातनम् । इन्द्रनीलप्रतीकाशं महाभोगैरलंकृतम् । विष्णुलोकात्परंस्थानं कुमारस्य महात्मनः ॥ स्वच्छस्फटिकसंकाशं वरभोगसमन्वितम् । स्कन्दस्थानात्परं स्थान मुमादेव्याः प्रकीर्तितम् ॥ तप्तचामीकरप्रख्य मशेषगुणसयुतम् । उमास्थानाच्चपरतः स्थानमाद्यमुमापतेः ॥ दिनकृत्कोटिसंकाशं सर्वकामसमन्वितम् ।' ब्रह्माण्डादूर्ध्वं स्कन्दोमाशंकरलोकवत् ब्रह्मविष्णुलोकावप्युक्तौ, स्कांदे काशीखण्डे उमालोकात्परोपि गोलोको दर्शितः । 'शिवलोकाच्च गोलोका दुमालोकाच्च सर्वतः । कुमारलोकाद्वैकुण्ठात्सत्यलोकात्समन्ततः ॥ तपोजनमहर्भ्यश्च सर्वेस्वर्लोकवासिनः । भुवर्लो-

Public domain. Digitization Muthulakshmi Research Acade

काच्च भूलोकान्नागलोकात्तथाखिलात्॥ स्नातुं माघे समायान्ति प्रयागमरुणोदये ॥' इति, अयमेव गोलोकोऽत्र विवक्षितः।

इत्थं श्रीकण्ठाचार्यविरचितब्रह्ममीमांसाभाष्याभिमतं रहस्यार्थजातं संक्षिप्तम्

अत्र मूलानि भाष्यवचनान्युदाहरिष्यामः।

तत्र धर्मज्ञानरूपायाश्शक्तेः सकलधर्मधर्मिगुणरूपत्वम्। 'सर्वत्र प्रसिद्धोपदेशात्' इत्यधिकरणे दर्शितम्। सकलचिदचित्प्रपञ्चमहाविभूतिरूपा महासंविदानन्दसत्ता देशकालादिपरिच्छेदशून्या स्वाभाविकी पराशक्तिः, परब्रह्मणः शिवस्य स्वरूपं च गुणश्च भवति। तद्व्यतिरेकेण ब्रह्मणः स्सर्वज्ञत्व सर्वशक्तित्व सर्वकारणत्व सर्वनियन्तृत्व सर्वोपास्यत्व सर्वानुग्राहकत्व सर्वपुरुषार्थहेतुत्वादिकं सर्वगतत्वं च न संभवति, किंच महेश्वर शिव महादेव रुद्रादि परमाख्याभिधेयत्वं च न संभवतीति। तस्यास्सकलजगदाधारपरमाकाशरूपत्वं जन्मादिसूत्रे 'आकाशशरीरं ब्रह्म' इति श्रुतिव्याख्यायां दर्शितम्। आकाशते इत्याकाशः, प्रकाशः चिदम्बरमुच्यते, न भूताकाशः विशेषाभावान्निखिलजगदण्डषण्डबुद्बुदनिकुरम्बजलधिस्थानीया परप्रकृतिरूपा परमशक्तिर्हि चिदम्बरमुच्यते, तत्स्वरूपंब्रह्म, आकाशशरीरं, परप्रकृतित्वं चिदाकाशस्य, 'सर्वाणि हवा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ति', 'आकाशो

Public domain. Digitization Muthulakshmi Research Academy

ह वै नाम नामरूपयोर्निर्वहिता' इत्यादि श्रुतिसिद्धमिति। दहराधिकरणेपि 'अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदाय' इति श्रुतसकलजगदाधारभावदहराकाशरूपत्वमस्याः प्रदर्शितम्। 'दहराकाशमध्यवर्तिपरमेश्वरो नोपास्यः, किन्तु दहरकाशः, दहराकाशे परमेश्वरधर्माणां 'अपहतपाप्मत्वादिगुणानां संबन्धप्रतीतेः, दहराकाशत्वमप्यस्य चिदंबररूपतयेति न विरोधइति' अस्याः परमपदपरमाकाशरूपत्वं आनन्दमयाधिकरणे दर्शितम्। परमाकशरूपः प्रकृत्यात्मा 'आत्माऽऽनन्दमयः' इतिश्रूयते, न विश्वाधिकं निमित्तं परंब्रह्म यत् 'सत्यं ज्ञानमनन्त ब्रह्म' इत्युच्यते, तस्माद्वा एतस्मादात्मन आकाशः संभूतः, इत्यादि प्रपञ्चप्रकृतित्वेन श्रुतः आनन्दमयः परमाकाशः, परमाकाशत्वरूपमस्य, 'यदेष आकाश आनन्दो न स्यात्' इत्यतोऽवगम्यते 'ब्रह्म पुच्छं प्रतिष्ठा' इति ब्रह्म आनन्दपरमाकाशस्याधारत्वेनावगम्यते।

अतएव 'स एको ब्रह्मण आनन्दः' इति ब्रह्माश्रितत्वेनावगम्यते। पुनरेष एव, 'आनन्दो ब्रह्मेतिव्यजानात्' 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते' इत्यादिना सर्वभूतप्रकृतित्वेनाभिधीयते। तत्र आनन्दो ब्रह्मेत्यानन्दस्य ब्रह्मत्वव्यपदेशस्तु, ब्रह्मधर्मत्वेन तदभेदात् 'सैषा भार्गवी वारुणी विद्या। परमे व्योमन्प्रतिष्ठिता', इति ब्रह्मधर्मस्वरूपे परमानन्दरूपे प्रपञ्चप्रकृतौ, परमशक्तिपर्याये चिदात्मनि, परमेव्योमनि, वारुणी विद्या

Public domain. Digitization Muthulakshmi Research Acade

समाप्तेत्युच्यते, ततो ब्रह्मधर्मस्वभावः प्रकृत्यात्मा परमाकाशारूपा परमशक्तिः आनन्दमयः इत्युच्यते, तद्धर्मित्वेन प्रतिष्ठेत्युच्यते'। अत्र परंब्रह्मेतीदमेव मतमाचार्याणामभिमतम्, नत्वानन्दमयः, परंब्रह्मेतिमतमित्यत्र शिवानन्दलहर्यां शिवार्कमणिदीपिकायां च निपुणतरमुपपादितमस्माभिः। जगत्सत्तास्फूर्तेः ब्रह्मचिच्छक्त्यंशरूपत्वं आरम्भणाधिकरणे व्यतिरेकमुखेन दर्शितम्। 'सच्चिद्रूपेण शिवेन यदि न व्याप्तम् जगत् तदा सत्तास्फूर्तिभ्यां विनाकृतं कथं अस्ति स्फुरति इति च दृश्येत, अतो मृदा घटादिकमिव कारणेन शिवेन कार्यमिदमपि व्याप्तं'। अत्र यद्यपि धर्मिणः शिवस्यैव जगत्सत्तास्फूर्तिरूपत्वमुक्तमिति भाति, तथापि तद्धर्मद्वारकमेव तस्य तद्विवक्षितमिति नेतव्यम्। मृदा घटादिकमिवेति परिणामदृष्टान्तानुगुण्यात्, 'तदव्यक्तमाह हि' इति सूत्रभाष्ये प्रत्यक्षादिना सिद्धा सत्ता न ब्रह्मेत्युक्तत्वाच्च, तस्य सकलजगदानन्दरूपत्वम्, 'अभावं बादरिः' इत्यधिकरणे परप्रकृतिरूपा परमसत्ता प्रकाशानन्दसमरसा पराशक्तिः परब्रह्मणः स्वरूपभूता परमाकाश उच्यते, तां प्रकृत्य दर्शितम्, 'कोह्येवान्यात्कः प्राण्यात्। यदेष आकाश आनन्दो न स्यात्। एष ह्येवानन्दयाति।' 'रसो वै सः। रसꣳ ह्येवायंलब्ध्वानन्दी भवति।' इति सर्वानुभव विषयत्वमस्याः श्रूयते। तथा च 'स एको मानुष आनन्दः।' इत्यारभ्य 'स एको ब्रह्मण आनन्दः।

Public domain. Digitization Muthulakshmi Research Academy

इति ब्रह्मपर्यन्तमुपाधितिरोधानादानन्दाविर्भावस्तारतम्येन श्रूयते ’ इति तथा आकाशोपास्तेश्चिच्छक्तिविषयत्वं, ‘ आकाशस्तल्लिङ्गात् ’ इत्यधिकरणे भूतग्रहणप्रयोजनं-प्रश्नोत्तराभ्यां आविष्कृतम्, ‘ भूताकाश इत्युपपदग्रहणेन किमितिचेत् परमाकाशस्य परमप्रकृतिरूपस्य सर्वभूतकारणत्वसद्भावात् सप्रयोजनम् । तर्हि परमेश्वर इति कथं निर्णयः ? तदभेदादिति सिद्धं ’ इति । जन्मादिसूत्रे एतदधिकरणविषयवाक्यस्य ‘ आकाशो अर्थान्तरत्वादिव्यपदेशात् इत्यधिकरणविषयवाक्यस्य च चिच्छक्तिविषयत्वेनोल्लिखितत्वादयमर्थः स्पष्टः । एवं सर्वत्र ब्रह्मलिङ्गवन्निर्देशादाकाश-पदयुक्तवाक्यानां चिच्छक्तिविषयत्वोक्त्या ‘ गायत्री वा इदं सर्वं भूतं ’ इत्यादिना निरूपितायाः गायत्र्युपासनायाः अपि तद्विषयत्वं सूचितं । तत्रापि हि ‘ यद्वै तत् ब्रह्मेति इदं वा व तत् योयं बहिर्धा पुरुषादाकाशः ’ इति प्रकृत-गायत्रीपरामर्शितच्छब्दसमानाधिकरणतया तद्विषयस्य ब्रह्म-शब्दस्याकाशशब्देन सामानाधिकरण्यात् । तथा ‘ अत एव प्राणः ’ इत्यधिकरणनिर्णीतार्थप्राणोपासनापि तद्विषया तत्रापि ‘ सर्वाणि हवा इमानि भूतानि प्राणमेवाविशन्ति प्राणम-भ्युज्जिहते ’ इति सर्वभूतोत्पत्तिलयकारणत्वलिङ्गसद्भावेन सर्वलोकगत्याकाशाविशेषात् ‘ आकाशस्तल्लिङ्गात् ’ ‘ अतएव प्राणः ’ इति सूत्रयोर्न्यायसाम्येन समानविषयत्वं सूचयितुं भाष्ये युगपदुल्लिखितत्वाच्च । ‘ सत्यात्मप्राणारामम् ’ इति

Public domain. Digitization Muthulakshmi Research Academy

श्रुतौ प्राणशब्दस्य ' प्राणः सकलाधारभूता चिदम्बरशक्तिरुच्येत ; स्वरूपभूतायां तस्यां आरम्भो यस्य तत् प्राणारामिति ' जन्मादिसूत्रे चिच्छक्तिपरतया व्याख्यातत्वाच्च । तथा च धर्मिणस्सकलजगत्सर्गरक्षासंहरणतिरोधानानुग्रहरूपपञ्चकृत्यकारित्वं जन्मादिसूत्रे , ' यत् सर्वज्ञत्वादिविशिष्टमष्टाभिधानाधिकरणं शिवतत्वं तदेव जगत्कारणं ब्रह्मेत्युच्यते ' इत्यादिना प्रपञ्चितम् । चिच्छक्तेः पुरुषरूपप्राप्त्या सकलजगदुपादानात् , प्रकृत्यधिकरणे ' मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं । तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ॥ इति श्रवणात् मायायास्सकलप्रकृतित्वं तद्विशिष्टत्वं महेश्वरस्य , तदवयवभूतेन , अंशभूतेन , तदीय चिच्छक्तिशकलेन भोक्तृत्वदशायां पुरुषसंज्ञकेन सकलजगद्व्याप्तिश्चावगम्यते , ' इति , मायिनः महेश्वरात् सकल चेतनाचेतनप्रकृतिपुरुषाभिव्यक्तो भवति , तद्रूपादीश्वरादव्यक्तचतुर्मुखाद्युत्पत्तिः , तथा च श्रुतिरीश्वरस्य पुरुषरूपमभिधत्ते ' पुरुषो वै रुद्रः ' इति दर्शितम् । अत्र श्रुतिगतं अवयवभूतेनेति पदं अंशभूतेनेत्यनेन व्याख्यातं तदपि महेश्वरांशभूतात् न साक्षात् , किंतु तद्धर्मचिच्छक्त्यंशद्वारकमिति , चिच्छक्तिशकलेनेत्यनेन विवृतमंशेनेतिवक्तव्ये शकलेनेत्युक्तिः ' विश्वोत्तरोत्तरविचित्रमनोरथस्य यस्यैव शक्तिशकले सकलस्समाप्तः । अध्वान मध्वपति मध्वविदो वदन्ति तस्मै नमस्सकललोकविलक्षणाय ॥ ' इति शिव-

Public domain. Digitization Muthulakshmi Research Academy

पुराणवचनस्योक्तार्थविषयत्वद्योतनार्थम् अव्यक्तचतुर्मुखाद्युत्पत्तिरिति जडाजडसकलप्रपञ्चोपादानत्वमुक्तम् , स्त्रीरूपप्राप्त्या परब्रह्ममहिषीत्वं , बहुषु स्थलेषु ‘ ऋतं सत्यं ’ इति मन्त्रार्थः कथ्यते , कृष्णपिङ्गळशब्दे प्रगृहीततया व्याख्यातं । पुरुषस्य नारायणस्य ब्रह्मकोटित्वं ईक्षतिकर्माधिकरणे ‘प्रपञ्चाकारत्वमन्तरेण यन्निरतिशयानन्दस्वभावं विष्णोः परमं पदं रूपं तदेव शिवाभिधं परं ब्रह्मेत्यविरोधः । यतो विष्णुशिवयोरुपादाननिमित्तयोरवस्थाभेदमन्तरेण स्वरूपभेदोनास्ति । ’ इति च दर्शितम् । ‘ सर्वो वै रुद्रः ’ इति परमेश्वरस्य सर्वात्मताभिधानमुपक्रम्य पुरुषस्य नारायणस्य हि सर्वात्मत्वमुपपादितम् । कथमस्य सर्वात्मत्वमित्याशङ्कायां ‘ पुरुषो ह वै रुद्रः ’ इति ‘ पुरुषस्य विद्महे सहस्राक्षस्य महादेवस्य धीमहि ’ इति च , पुरुषोपि परमेश्वरस्य महाविभूत्या जगदाकारमिति निरूपितमिति । उमाया ब्रह्मकोटित्वं तत्रैवाधिकरणे ऋतं सत्यमिति मन्त्रार्थविवरणे ‘ परशक्त्या प्रणवमन्त्रवर्णव्यत्यासरूपोमाशब्दवाच्यायाः शबळाकारत्वेन कृष्णपिङ्गलं ’ इत्यनेन वाक्येन दर्शितम् । अत्र परब्रह्मलिंङ्ग प्रणववाच्यत्वमुमायाप्यस्ति । तत्र प्रणवमात्राणामुकारस्ततो मकारस्तदनन्तरमकार इति व्यत्यासावस्थानमात्रमिति दर्शितम् । अयमर्थो लिङ्गपुराणे-शिवेनाम्बिकायै वर्णितः । ‘ त्वदीयः प्रणवः कश्चिन्मदीयः प्रणवस्तथा । त्वदीयो देवि मुद्राणां शक्तिभूतो न संशयः ॥

Public domain. Digitization Muthulakshmi Research Acade

अकारोकारमकारा मदीये प्रणवे स्थिताः । उकारं च मकारं च अकारं च क्रमेण तु । त्वदीयं प्रणवं विद्धि त्रिमात्रं प्लुतमुत्तमम् ॥ इति वचनादकारस्य प्लुतभावः । तस्मात् ओं, उमाशक्तिः इत्यत्र प्लुतोच्चारणंकार्यं। लोके तु स्त्रीत्वविवक्षायामप्रत्ययाद्दीर्घान्तत्वमुपपद्यते । नारायणस्य परिणामितयोपादानत्वं, प्रकृत्यधिकरणे परिणामादिति सूत्रभाष्ये निर्विशेषस्य शिवस्य परिणामासंभवशंकायां 'यथा निमित्तस्य प्रकृतित्वेपि न विकारादिस्पर्शः तथा परिणामस्संभवतीति' तत्परिहारं प्रतिज्ञाय कोयमपूर्वःपरिणामः कुतूहलिनो वयं तच्छ्रवणे विविच्यतां ' इति पुनः शङ्कामुद्भाव्य ' श्रुणु विवेचयामः ' इत्यादिना साक्षान्निर्विकारस्य शिवस्य पुरुषावस्थात्वाकारकपरिणाम इत्युपपादनेन दर्शितं , तथान्यप्रतिषेधादित्यधिकरणेप्युक्तम् ' सर्वज्ञात्सर्वशक्तिमतः परब्रह्मणः शिवात् विश्वाधिकात्प्रथमं परप्रकृतिभूता पराशक्तिः प्रादुर्भवति । सा प्रथमभोक्तृत्वदशायां पुरुषइत्युच्यते । यः ' सहस्रशीर्षा पुरुषः ' इतिश्रूयते । तदात्मन एव शिवात्सकलचेतनाचेतनप्रपञ्चपरिणामः ' इति । जीवानां न स्वरूपेण तद्विकारत्वं किन्तु धर्मज्ञानसंकोचविकासादि विशिष्टतया , स्वरूपस्तु केवलं तदंशा इत्येतत् ' अंशो नानाव्यपदेशात् ' इत्यधिकरणभाष्ये प्रपञ्चितं । नारायणप्रपदनस्य शिवपदप्राप्तिसाधनत्वं पाञ्चरात्राधिकरणे पाञ्चरात्रप्रामाण्यसमर्थनानन्तरं शङ्कोत्तराभ्यां दर्शितम् ' , ननु

Public domain. Digitization Muthulakshmi Research Academy

'पुरुषो ह वै रुद्रः' इत्यादि श्रुत्या परमेश्वर एव वासुदेवः तज्ज्ञानाराधनादिकमपि क्रमेण परमेश्वरपदप्राप्तिसाधनमिति श्रूयते ; तदाराधनप्रतिपादकस्य पाञ्चरात्रस्याप्रामाण्ये तस्यानाराध्यत्वप्रसङ्ग इति चेत् न , श्रुतिविरोधात् पाञ्चरात्रस्याप्रामाण्येपि तस्य का हानिः । श्रुतिप्रसिद्धमार्गेण तदाराधनसंभवात् ' इति। देवदेवैर्जुष्टत्वमाद्यस्थानस्य ' ते हि साक्षाद्दिविषदोन्तरिक्षसदस्तथा ' इत्यादि पुराणवचनोदाहरणेन सूचितम् । तस्य परब्रह्मशक्तिरूपपरमानन्दमूर्तिरूपत्वं ' विशेषं च दर्शयति ' इति सूत्रभाष्ये ' विष्णोः प्रपञ्चावस्थितस्य परं उत्कृष्टं पदं स्वरूपं परमाकाशरूपं परमानन्दलक्षणं शिवस्य परब्रह्मणः पदमेव । यत्रासौ निहितात्मा प्रपञ्चाकारोपि न संसरति ' इति। वैष्णवाद्यपरिमित शक्तिविशेषाणामुमांशाऽभेदत्वं , ' अप्रतीकालंबनान्नयती ' ति सूत्रभाष्य ' सर्वज्ञतया मनोवाग्विपर्यासरहितं स्वशक्तिमरीचिभिस्सकलजगत्पूरकं स्वाविभक्तया परमप्रकृतिरूपया परमानन्दचिदेकरसपरमाकाशलक्षणया स्वावस्थाभेदपरमचेतननारायणारब्धहिरण्यगर्भादिसकलकार्यप्रपञ्चया पराशक्त्योमया शबलितरूपं निर्विकारं त्रिलोचनं परं ब्रह्म सर्वोत्तरमिति प्रतिपादितं । अत्र स्वशक्तिमरीचयः स्वशक्तेः परमप्रकृतिरूपायाः मरीचयः तदंशभूता वैष्णवादि शक्तिविशेषा विवक्षिताः सर्वत्र प्रसिद्धोपदेशादित्यधिकरणे शिवस्य सर्वानुग्राहकत्वादिधर्माणां शक्त्यधीनत्वप्रतिपादनात्तस्याः श्रुतिप्रसिद्ध

Public domain. Digitization Muthulakshmi Research Academy

परब्रह्मविद्याप्रदातृत्वं सूचितम् । बहुषु प्रदेशेषु 'उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम् । ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात् ॥ 'ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलं'। 'अम्बिकापतय उमापतये नमो नमः' इति कैवल्योपनिषदादि मन्त्राणामुदाहरणात्तस्याः शिवसहोपासनादिनियमस्सूचितः। शिवोपासनायास्साक्षाद्दिव्यस्थानप्रदातृत्वं प्रथमसूत्रमारभ्य तत्र तत्र सूत्रे बहुधा प्रदर्शितम् । 'विकल्पोऽविशिष्टफलत्वात्' 'आप्रायणात्तत्रापि हि दृष्टम्' इत्यधिकरणयोरुक्तम् । , उपासनासाक्षात्कारयोश्शिवाभेदविषयत्वम् 'आत्मेति तूपगच्छन्ति ग्राहयन्ति च' इत्यधिकरणे वर्णितम् । उमानारायणोपासनयोः परंपरया दिव्यस्थानप्राप्तिहेतुत्वमप्रतीकालम्बनानिति सूत्रभाष्ये दर्शितं' 'ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे' इति श्रुतेः परब्रह्मणः शिवस्य परमविभूतित्वेन ये विष्णुमुपासते ते तदवस्थत्वात् ब्रह्मशब्दवाच्यस्य तस्य लोकं प्राप्य प्रादुर्भूततद्विभूतयः परान्तकाले चरमदेहावसाने परामृतं शिवं प्राप्य मुक्ताभवन्तीति विष्णूपासकानामर्चिरादिनाविष्णुपदप्राप्तिपूर्वकं विलम्बेन शिवपदप्राप्तिरिति । ' नारायणोपासनायामुक्तमिदमम्बिकोपासनायामपि तुल्यं न्यायसाम्यात् । 'कन्यारूपामुमां शान्तां सूर्यकोटिसमप्रभाम् । ध्येयमानः सदा भक्त्या देवास्थानमवाप्नुयात् ॥' इति शिवधर्मोत्तरे

Public domain. Digitization Muthulakshmi Research Academy

तदुपासनायास्तल्लोकप्राप्तिहेतुत्वस्योक्तत्वाच्च । तल्लोकप्राप्तिद्वारकोक्तिशिवोपासनाद्वारकस्याप्युपलक्षणम् । ‘ यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः । तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यति ॥ ’ इति मन्त्रस्य भाष्ये बहुषु प्रदेशेषूदाहृतत्वात् । दिव्यस्थानस्य विष्णुलोकात्परत्वम् सांपरायाधिकरणे दर्शितम् ‘ विष्णुपदसम्बन्धिनी विरजानदी प्राकृतप्रपञ्चसीमावधिः । तदनुप्रवेशतः प्रक्षीणाः सर्वकर्मलेपाः योगिनो विष्णुपदादूर्ध्वमप्राकृतशिवपदं परमानन्दमयमनुप्रविशन्ति ’ इति । अत्र विष्णुलोको गोलोकान्तर्गत एव विवक्षितः । परमशिवलोकन्तर्गतशिवलोकं प्राप्तानां पुनस्संसरणाभावस्तु अनावृत्यधिकरणे ‘ दिनकृत्कोटिसंकाशं स्थानमाद्यमुमापतेः । सर्वकामसमायुक्तं विशुद्धं नित्यमक्षयं ॥ संप्राप्य तत्पदं दिव्यं समस्तक्लेशवर्जिताः ॥ सर्वज्ञास्सर्वगाः शुद्धाः परिपूर्णा भवन्ति च ॥ विशुद्धकार्यकरणाः परमैश्वर्यसंयुताः । सदेहाश्चविदेहाश्च भवन्त्यात्मेच्छया पुनः ॥ ये संप्राप्ताः परं स्थानं ज्ञानयोगरता नराः । न तेषां पुनरावृत्तिर्घोरेसंसारमण्डले ॥ ’ इत्यादि वचनैः व्यवस्थापित इति सर्वं समञ्जसम् ।

आमथ्यभाष्यदुग्धाब्धेराप्तं रत्नत्रयं ततः ।
शम्भुर्गौरीहरिश्चेति तच्चसम्यक्परीक्षितम् ॥

॥ रत्नत्रयपरीक्षा संपूर्णा ॥

Public domain. Digitization Muthulakshmi Research Acade

Public domain. Digitization Muthulakshmi Research Acade

Public domain. Digitization Muthulakshmi Research Acade

Public domain. Digitization Muthulakshmi Research Acader

Copies can be had of

SESHADRI PRESS, MYSORE.

M. V. SESHADRI & Co.,
Balepet, Bangalore City 2

Public domain. Digitization Muthulakshmi Research Acade